इत्यमितिबहुलवचनात्तवाकर्मणिक्विपप्रा-
ड्विवेचयतिविचारयतिकर्मणण् न्यक्षाद्रि

त्वात्कुत्वंप्राड्विवाकइत्यन्येअक्षान् व्यवहारान्
पश्यतिण्वुल् अक्षदर्शकः अक्षः कर्षेतुषेचक्रेपा-
शकटव्यवहारयोरितिविश्वः द्वेधर्माध्यक्षस्य २॥
प्रतीहारोद्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ॥
प्रतिह्रियतेवार्यतेऽनेनेतिघञ् उपसर्गस्येति
वादीर्घः प्रतिवाभिह्रियतेरातोऽभिमुखत्वेनानय-
तिहरतिबहिःप्रापयतित्वलतिकर्त्तनेभ्योणः १
प्रतत्यदेप्रतिहारोस्त्रस्वादिः अन्येषामपीतिदी-
र्घत्वेदीर्घेडितिरपीत्यन्येप्रतीहारोद्वारमधिकारि-
विषयत्वेनास्यास्तीतिअर्शआद्यचिप्रतीहारः
इत्यन्ये द्वारंपालयतिकर्मण्यण्द्वारितिष्ठति
स्थीतिकःद्वाःस्थःद्वारिस्थितत्वात्द्वाःस्थितः
तंराज्ञोबोधयतिदर्शयतिद्वाःस्थितदर्शकइत्ये-
कंनामद्वाःस्थितोदर्शकाख्येतिनामद्वयमित्यन्ये १
स्याद्दर्शकोदर्शयिताप्रतीहारोपिदर्शकःइतिरु-
द्रःद्वारपोद्वाःस्थितोदर्शइतिरभसः पंचद्वारि-
कृतस्य ५ ॥ रक्षिवर्गस्त्वनीकस्थः ॥ अवश्यं
रक्षंतीतिरक्षिणः तेषांवर्गोगणोऽस्यरक्षकत्वेना
ऽनेकेनसम्बन्धेनतिष्ठतिअनेकस्थः एवंवत्कः १
द्वे २ ॥ अथाध्यक्षाधिकृतौसमौ ॥ अधिगतः १
अक्षोऽस्तोव्यवहारोऽनेनेतिव्यक्षः अधिकृतोऽने
हितेष्ववासमक्षः अक्षश्रोपचाच्चुअधिक्रि-
यतेस्माधिकृतः द्वेअधिकृतमात्रस्य २ ॥ स्थाय-
कोधिकृतोग्रामे ॥ एकत्रग्रामेऽधिकृतोनियो-
जितःनियोगात्स्थावांतस्यात्तच्छीलमस्यलषप
तपहस्यातेशीभृत्यादिनाउकञ्स्थायकः ए-
कं १ ॥ गोपोग्रामेषुभूरिषु ॥ भूरिषुबहुषु
ग्रामेष्वधिकृतोगोपयतिरक्षतिपचाद्यच्गोपः

रा॰ मं॰

292
272

२ ॥ भौरिकः कनकाध्यक्षः ॥ भूरिणि सुवर्णे
नियुक्तः भौरिकः तत्र नियुक्त इति ठक् स्वर्णाधि
भूरिचं इहाविति वल्यते कनकाध्यक्षः इतिष
ष्ठीसमासः २ ॥ रूप्याध्यक्षस्तु नैष्किकः ॥ रू
प्यं रजतं तदेव निष्कं एवं वत्तरुक्म नैष्किकः टंक
पतिः नैष्किक रजताध्यक्षः इति रभसाह्वयः द्वे
कादिशालायां नियुक्तस्य २ ॥ अंतःपुरे त्वधि
कृतः स्यादंतर्वंशिको जनः ॥ तादृस्यलक्ष
यां तत्राभ्यंतरस्यो वंशो गृहमंतर्वंशः तत्र भवा
अपि कृतत्वाद्ध्रियमाना अंतः एवंपदाह त्रिसंख्या
एवं कथाहृस्वभावः मत्वर्थे ठञ् जनेत्रिलिंगता
जनजनने जहोत्यादौ जननी प्रादुर्भावे चरिवादौ
पचाद्यच् जनः ॥ सौविदल्लाः कंचुकिनः स्था
पत्याः सौविदाश्च ते ॥ सुविदं ते विवोढारं लांति
सुविदल्लाः रूढात्त्रियः तत्र भवा विद्यमाना अ
ण् शोभनं विदंति सुविदः पंडितः किं चेति किं
ज्ञानं तिस्त्रातत्वेन गच्छतीति सुविद् इस्मपालः तं
लातिवा सुविदल्लमंतः पुरं अकारांतलक्षणाः कां
तो लीतिलत्वंतत्रभवे अण् सौविदल्ला इति वा कंचु
कः चोलकः विनीतवेशार्थमस्त्येषामिति ठन्
कंचुकिनः तिष्ठत्यस्मिन्निति तिष्ठ जनर्थे कः स्थः
स्थाने पतिष्ठेतिस्थपतिः तस्येमे स्थापत्याः दि
त्यादिना ण्यः स्थापत्याः ह्रस्वत्वे स्थपतय एवा
ल्पः स्थपतिः तस्येमे एवं एवं वस्येस्थापत्या
स्थपतिरेव स्वार्थे ष्यञ् इत्यन्ये स्थापत्याः शोभ
नं वेत्ति इगुपधात्कः सुविदो राजा तस्यामी पारेदवा
तोऽण् सौविदा वहिः संचरंती नामतः परतो
ऽपिप्रेलकाः पुरुषाः तत्र वारणाय वेत्रधारा तेः ।

स्थानादेवहिर्मेहूलिकाख्येषां नामसंचरतकं ५ ॥
षण्ढो वर्षवरस्तुल्यौ ॥ शाम्यति शिश्नाभावा
त्वशमे ढः षाण्ढः टवर्गचतुर्थोपधः तालव्यादि
षाण्ढः क्लीवस्तकं चुकीति तालव्यादौ रभसः २
वृष्ण्योर्वरणं आहृषाहेति णिजभावपक्षे वरति
निराकरोति पचाद्यच् वर्षस्य वरेतः सेकस्य वरो
वं वरः येल्पमत्वाः प्रशमिनः क्लीवा स्त्रीस्वभा
विनः त्यान्त्यादुड्राः कार्येषु ते वै वर्षवराः स्मृ
ताः इति प्रधामत्यंतान्तर्महूलिकानां द्वे २ ॥ से
वकार्थ्यनुजीविनः ॥ सेहसेवने गुल्सेवकः
अर्थनमर्थो याच्ञा तद्योगादिनिः अर्थी अर्थ्यतेत्र
र्थः कर्मणि घञ् सोऽस्यास्त्विहितः इति अर्थ्यस्यामं
निहित इत्नीनिर्वा उपसर्गवलात् गुनः पुनरनु
जीवति सेवते णिनिः प्रभोरनुपश्चाज्जीवति वा
णिनिः त्रीणि सेवकस्य ३ ॥ विषयानंतरो
राजा शत्रुः ॥ विषयः स्वदेशः तस्मादनंतरो
व्यवहितः एकविषयाभिनिवेशी शात्तयति
तिशातते नेच्छ्वदयः चेति रुः शत्रुः ॥ अतः परं मि
त्रं अतः शत्रोः परमव्यवस्थितो राजा मेद्यति स्निह्य
ति ञिमिदा इति उपकारित्वात् उदासीनः परत
रः विजिगीषोः शत्रुमित्रभूमिद्वयो व्यवहितः पर
तरोतिव्यवहितत्वादेवनोपकारीनाप्रकारी
केवलमूर्ध्वमासीन इव उदासेः सानच् एकं २
॥ पार्ष्णिग्राहस्तु पृष्ठतः ॥ शत्रुजयायोद्यत
स्य विजिगीषोः शत्रुप्रयातेन यः पार्ष्णिं पश्चाद्भागं
गृह्णाति यात्रानिक्रमेण अण् सेन्यपृष्ठे पुमान् पार्ष्णिः
पश्चात्पर्व विजिगीषयोरिति विश्वः एकं शत्रुविशेष
स्य १ ॥ रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः द्वि

रा॰
स॰

३९३
273

द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः अभिघा
तिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ रप
ति दोषं व्यक्तीकरोति रप व्यक्तायां वाचि रपेरिच्चोप
धाया इति कुप्रत्यये उपधाया इत्वे च रिपुः वीरस्य
कर्म वैरं विरोधः वैरमेषामनिकयोरपि निर्देशाद
ए फवाद्दिपाद्दाहणात्यतः तरफकं तत्र तत्या
दर्शनात् तद्योगाद्वैरी मत्वर्थे इतीनिः सपत्नी
व संतापहेतुत्वात्सपत्नः व्यत्सपत्न इति निर्दे
शात्कारः इयर्ति विरोधमिति अरिः अच इति इः
द्वेष्टीति द्विषन् द्विषो मित्र इति शत्रुः द्वेषः शील
मस्य द्वेषणः क्रुधमण्डार्थेभ्यश्चेति युच् क्रोधे
नाः पचिकीर्षया हृदयाकलुषत्वात् दुष्टं हृदयम
स्येति दुर्हृत् तदन्तः सुहृद्दुर्हृदौ मित्रामित्रयोरिति
निपातनात् हृदादेशः द्वेष्टीति द्विड् षान्तः सत्सू
द्विषेति क्विप् विरुद्धः पक्षः साध्यमस्येति विपक्ष
पक्षो मासार्धके पार्श्वे गृहे साध्यविरोधयोरिति मे
दिनिः विरोधो विरोधः पक्षोऽस्येति विपक्षः हि
ताचरणात् हितः न हितोऽहितः न विद्यते हित
मस्मादिति वा अमति गच्छति वैरं अम गत्यादौ अम
ति हन्तीति इत्रः अमरोगे वा मित्रः अमेर्द्विषतीति
इत्रन् मित्रविरुद्धकर्माचरणात् अमित्रः लोकाश्र
यत्वाल्लिङ्गमित्यन्ये स्यातामभित्रो मित्रे च इति
माद्यः दस्यति अभिमतार्थं उपक्षपयति दस्युः त
सुतत्पोषणोः दसु चेति गणपाठात् जनिमनिश
शिष्योकरितियुः बाहुलकाद्यो नादेशो भा
वः शत्रुनासिकत्वात् प्रतिजानाति शत्रुकृतः एव
शात्रवेव शात्रवः प्रज्ञादित्वादण् अभिमर्वेतोऽहं वे
शीलमस्येति अभिघाती णिनिः अभियातीति क्वि

विज्यादः तत्र यती प्रयत्ने निराकारे चेति चुरादि
ण्यन्तात् अच् इरइ इति डः अभिमुखं घातीति याति
तेः क्विप् अभिघातीति मत्वर्थेऽहेऽष्यतीति याति अ
मित्रः इति रत्नकोषः एरयति पालयति वारो
षमिति परः पचाद्यच् इत्वोऽहांश्चादयदीप
रोमित्यरातिः बाहुलकात् इव मिश्रोऽरिनितिः
वलारातिः शचीपतिरिति स्ववेगैः प्रतिकूलम
र्थमर्थयती प्रत्यर्थी अर्थ याच्ञायामा वश्य
केणिनिः प्रतिकूलमर्थितुं शीलमस्य ताच्छी
ल्ये वा णिनिः परदोषाख्यानेन पन्थयति गच्छती
ति परं पन्थी पथि गतावितिधातोः चुरादि ण्यन्ता
त् ग्राह्यादित्वात् णिनिः परिशब्दे प्रकृत्य दोषाख्या
नेन निरसनेन जावाब्याणमोऽशुभपाणे इति मेदिनिः
॥ इन विंशति शत्रोः २१ ॥ वयस्यः स्निग्धः
सवयाः ॥ वयसा तुल्यो वयस्यः नौवयइत्या
दिना यत् शब्दभिन्नाभावाच्चतुल्यवय
स्कप्रियवाचकः स्निह्यतीति स्निग्धः स्निहप्री
तावित्यतो मतिबुद्धिपूजार्थेभ्यः चेति चकारात्
वर्तमाने क्तः समानं वयोऽस्येति सवयाः सांतः ज्यो
तिर्जनपदेत्यादिना नित्यं सभावः त्रीणि प्रिय
तुल्यवयसः ३ ॥ अथ मित्रं सखा सुहृत् ॥
मित्रशब्दमेव मित्रमाविष्टलिंगं समानः ख्यो
यते जनैः समानं ख्यातीति वा समाने ख्यः स चो
दात्तः इत्यौणादिकं डित्युत्वं डि
त्वात् टिलोपः यलोपश्च यलोपः इत्युत्वं डितः स
मानस्य सभावे अनन्त्यात्वान्न इ सखा सहैव
पचिकीर्षया स्निह्यति स्निग्धत्वात् शोभनं हृद

यं॰ सं॰

३९४
९७५

यमस्येतिरुहत इर्हत्वाविनिमाधुः ज्ञीणिमि
त्रस्य ३ ॥ सक्लेसासपदीनेस्यात् ॥ सक्लेभी
वः कर्मवासक्लेषुयः सक्लेसस्रभिः पदैरवाप्यते
सासपहीनं सक्लेमितिसाधु हेसक्लेसस्य २ ॥
अनुरोधोनुवर्त्तनं ॥ अनुगमस्यरोधनमावरण
मनुरोधः भावेघञ् अनुगम्यवर्त्तनेविज्ञाराधः
नमनुवर्त्तनं हेआराधाहेरिपसेपाटनस्य २ ॥
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः चार॰
श्चगूढपुरुषः ॥ अर्हतीत्यर्हः पचाद्यच् योग्यो
र्हो यथार्हवर्णः प्रकारोस्य यत्रयेन प्रकारेणात्म
त्तत्वंज्ञातेशक्यतेतत्रयथाभूतः प्रकारोस्येत्य
र्थः वर्णाः स्याड्डेहरूपयोरितिधरणिः प्रकर्षे
णनिधीयतेआरोप्यतेतेयमत्रेतिउपसर्गाज्ञा
नः किरितिकिः प्रणिधिः तत्त्वज्ञानार्थमपस॰
र्पत्यपिकंअमतिपचाद्यच् अपसर्पः अपसर्पे
सर्पत्यपसर्पः इतिसुभूतिः अवच्छन्नः सर्पत्य
वसर्पइतित्वस्वामी चरतिजानातिपरतत्त्वं॰
अचूचरः अत्याद्यणिचारः स्पशतिपरतत्त्वंस्प
शतिपरतत्त्वज्ञानायपनायअचूस्पशः स्पशति
बाधतेवापरान्तस्पशबाधनस्पर्शनयोःअचूस्ता
लक्ष्योतोरेफश्चन्यः गूढआहतः गूढपुरुषो गूढ॰
पुरुषः सप्तचरमात्रस्य ७ ॥ अत्राद्योवणिग्भ॰
कृषीवलभिन्नव्यापकाहित्वलेननित्यस्था॰
यिनश्चरस्य पंचकस्येशापरहेशाश्रमणशील॰
स्येतिकलिंगादयः ॥ आप्तः प्रत्ययितःसमौ
॥ रागद्वेषविनिर्मुक्तआप्तइत्यभिधीयते आ॰
प्नोतेःकर्मणिक्तः प्रत्ययोविश्वासः संजातोःस्य
तारकादित्वादितच् प्रत्ययितः प्रत्ययःशपथेर्

प्रेविश्वासाचारहेत्वोषितिविश्वः हेअविसंवादि
वाक्तेहितेविश्वासाधारस्य २ ॥ सांवत्सरोज्यो॰
तिषकोदैवज्ञगणकावपि स्युर्मौहूर्तिमौहूर्तज्ञा
निकार्तान्तिकाअपि ॥ संवत्सरःकालोपलक्ष
णंतंमुहूर्त्तंचवेत्तितदधीतेतद्वेदत्यण्सांवत्स
रः एवंमौहूर्त्तः ज्योतिर्ग्रहनक्षत्रादितदधिकृ॰
त्यकृतोग्रंथोपिकृत्वाकृतोग्रंथइत्यण् संज्ञाप
र्वकत्वाद्वृद्ध्यभावः ज्योतिषंतद्वेदक्रतुकथादि॰
नाट्ठक्ज्योतिषिकोहडियकज्ञः एवंमौहूर्तिकः॰
दैवंपूर्वकृतंशुभाशुभंकर्मतज्जानातिदैवज्ञः॰
आतइतिकः ग्रहादिसंचारंगणयतिण्वुल्॰
गणकः स्त्रियांपुंयोगादितिङीषिगणकी ज्ञा॰
नंविज्ञानंतद्योगात्ज्ञानी कृतांतोयमसिद्धांत
दैवाकुशलकर्मस्वितिवक्ष्यते कृतान्तंदैवंवेत्ति
पूर्ववत्ठक्कार्तान्तिकः अष्टौदैवज्ञस्य ८ ॥
तांत्रिकोज्ञातसिद्धांतः ॥ तंत्रंसिद्धांतंवेत्तिएवं
वत् ठकादितंत्रंप्रधानेसिद्धांतइतिवक्ष्यतेज्ञा
तःसिद्धांतःस्थिरपक्षोयेनसतथा द्वेतंत्रार्थज्ञा
तः २ ॥ सत्रीगृहपतिःसमौ ॥ सदादानेन
यज्ञश्चसत्रंतद्योगात्सत्रीसत्रमाच्छादनेयज्ञे॰
सदादानेवयोवतइतिविश्वः गृहपतिर्गृहस्थः
द्वेसदान्नादिदानकर्त्तृगृहस्थस्य २ ॥ लिपि॰
कारोक्षरचणोक्षरचुंचुश्चलेखके ॥ लिपिक
रोतीतिकः लिपिकरः अक्षरैश्चंचुचणौअक्ष॰
रैःप्रतीतः अक्षरचंचुः अक्षरचणः शिल्पिनिष्वु
न्लेखकः चत्वारिलेखस्य ४ ॥ लिखिता॰
क्षरविन्यासेलिपिलिबिरुभेस्त्रियौ ॥ लिख्य
तेकर्मणिक्तः लिखितमक्षराणांवर्णानांसंस्था

रा॰
मं॰
394
275

नमाकृतिगरोपणां ततो लिखितादक्षरयोर्द्वंद्वः लि
पडपदे हे लिपिः लिबिः मैत्रोधातुः ताभ्यामित्युपधाले
एषोदरादिरिति स्वामी इत्युपधात्किरितिव्या
ख्यामस्ते वत्वाद्येवनामानि केचित्तु लिखिताद
रसंस्थान इत्येकमेवपदं समस्म्यंतमित्याहुः त
दृसत्त तथामतिलिलिखितमितिविशेषणाद्वा
थैस्यात् नहि लिखितं विनाक्षरसंस्थानं भवती
तिव्याख्यामस्तेत ग्रन्थेतु पुस्तकाद्यैर्लिखितैः व
रसंस्थान इति व्याचक्षते लिपेः २ ॥ स्यात्संदे
शहरो दूतो ॥ संदिश्यते सौ कर्मणा वचनं संदे
शोनिवेद्यत्वेन ग्राहितो वाग्विशेषः तस्य हरः प्रा
पकः संदेशहरः हरतेरनुद्यमनेऽच् दूतवतिगा
च्छति दुङ्गतौ हतनिर्भ्यां दीर्घश्चेति क्तः दीर्घत्वं
वहतः इडुपरितापे योक्तवादित्वात् दवतेप
रितापयति वा एवं वक्तः द्वे २ ॥ इत्येतत्त्राव
कर्मणि ॥ तस्य हृ तस्य भावः प्रवृत्तिनिमित्तं
कर्मक्रिया एते द्वे अपि इत्यस्य भावस्य वाचे इत्यर्थः
हृत्वणिग्भ्यां चेति यः प्रातिपदिकग्रहणे लिंग
विशिष्टस्यापि ग्रहणं काले हृत्तौ नो भावकर्मणो
हृत्वं ब्राह्मणादित्वात् ष्यञि दौत्यं चात्र २ ॥
अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ॥ अ
ध्वानमलंगच्छति अध्वनो यत्खाविति खयतौ
ध्वात्माधानौ खेदैवाभावकर्मणोरिति प्रकृतिभा
वाद्विलोपः अध्वनीनोऽध्वन्यः अध्वानं गच्छति
गेताश्चेति डः अध्वगः पंथानं नित्यं गच्छति पथो
णाइतिणः पंथाहेशश्च पान्थः स्त्रियां पान्था गच्छ
न्त्यर्थे पथः कन्पथिकः स्त्रियां पथिकी पथिजं
घाल इत्यर्थे ऽः तत्र जंघाले पथ इति कृणपथकः

स्त्रियां पथिका पंचपथिकस्य ५ ॥ स्वाम्य
मात्यसुहृत्कोषराष्ट्रदुर्गबलानि च राज्यांगा
नि प्रकृतयः पौराणां श्रेणयोपि च ॥ संधिर्ना
विग्रहो यानमासनं द्वैधमाश्रयः ॥ षड्गुणाः
शक्तयस्तिस्रः प्रभावोत्साहमंत्रजाः ॥ क्ष
यः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनां ॥ २
स्वाम्यादयः सप्त परस्परोपकारित्वाद्राज्यांगा
नि राज्यस्य राजत्वकर्मणो वा अंगानि उपायाः साध
नानीत्यर्थः तत्र स्वामी राजा अमात्यो मंत्री सु
हृन्मित्रं कोषः स्वर्णादिकसंघो भांडागारः कोष्ठः रा
ष्ट्रं जनपदवती भूमिः पर्वतादिभिः दुर्गमपुरं
दुर्गं बलं सैन्यं राष्ट्रग्रहणेनैव पौरश्रेणीग्रहणे
सिद्धे पुनर्वचनं प्राधान्यख्यापनाय एकोप
ख्येः सजातीयसमूहः श्रेणिः एतानि सप्त प्रकृ
ति शब्दवाच्यानि एतानि परस्परानुकूल्यानि
राज्यसाधकानि इति प्रतिपादयितुं राज्यांगा
नि विशेषेण प्रकृष्टं करोतीति राज्यमिति क्तिन् स
प्तैतानि राज्यांगपदप्रकृतिवाच्यानि ७ ॥ अ
ष्टांगं राज्यमिति कस्यचिन्मतमाश्रित्याह पौ
राणामित्यादि कामंदकीये ॥ स्वाम्यमात्यश्च
राष्ट्रं च दुर्गं कोषो बलं सुहृत् परस्परोपकारी
दं सप्तांगं राज्यमुच्यते ॥ पौरश्रेणिभिः सहा
ष्टांगमपि राज्यमिति राज्यदर्शितं प्रकृतिः स्त्रि
यामिति प्रागुक्तमेव द्वे स्वाम्यमात्यादीनां २ ॥
संधिरिति ॥ एते संध्यादयः षड्गुणा गुणशब्द
वाच्या इत्यर्थः तत्र स्वर्णादिदानेन बंधुभिः प्रीत्यु
त्पादनाय मैत्रीकरणं संधिः संदधाते क उपसर्गे
घोः किरिति किः अन्ये च बहुविधो ग्रंथः विस्तृ

गं
मं

ह्याणंपरमंडलेलाहल्लंहनच्छेलादिविग्रहः तेव
प्रकाशकृतत्संसीमेटेनत्रिविधमाहुः उपेक्षित
शक्तेः कृतमूलराष्ट्रेरत्नकस्यशत्रोरवस्कंदना
यथाज्ञायानेतत्स्थविगृह्ययानेसंधाययानेप्रसं
गयानेउपेक्ष्ययानेचेतिपंचविधंपश्चात्स्थायि
नःशत्रोः बलव्यसननपरवासादिकेकृत्वाउ
पेवर्त्तिनिशत्रौयात्राबहिर्विगृह्ययानेशून्यराज्य
ग्रहणात्समर्थेनशत्रुनासंधिः संधायादेः संग्रहे
नगमनंसंधाययानंबलवद्वैरिणासंधायमि
लित्वासंमिल्यतैः सहकांतरेशौयद्यानंतत्सं
भूययानमेकप्रकृतयानस्यांतरेपास्थितेत्र
हेषोपियद्यानेशत्रौशत्रोर्बेलाहानायपथिप्रा
मेषुशत्रुमित्रेषुग्रपरेषुकलिषुशत्रुमुपेक्ष्या
यद्यानेतदुपेक्ष्ययाने नाहमित्रानीयोद्धुंसम
र्थइतिकालादिप्रतीक्षयाविजिगीषोदुर्गेगोसी
न्वर्थयतोस्थितिरासनंतदपिविगृह्यासनंसं
धायासनंनादिएवंवत् पंचविधंविग्रहेणशत्रो
रवस्कंधेशक्रस्यतद्देशादिकविनाशदुर्गेगेप्र
विशणवस्थानंविगृह्यासनंतदल्पबलत्वाद्भे
दीयमानाशयोः संधिंकृत्वावस्थानंसंधायासनं
बलिनः शत्रोः जयेशक्रस्यदुर्गाश्रयेणापिस्था
तुमशक्यत्वात्बलिनामित्रेणशत्रुणावापि
मिलित्वावस्थानंसंभूयासनंशत्रुमभिगच्छे
तोमित्रागमनादेकत्रसर्वचप्रसंगेनोत्तरास्थि
तिः प्रसंगासनंबलिनमपिशत्रुदुर्गेयाहिना
नित्यमपचीयमानमुत्प्रेक्ष्यतत्प्रपचयापेक्षया
वस्थितिरुपेक्ष्यासनंबलिनोवैरिणोर्मध्येका
कादिवद्वलवितस्योभयत्रवाचावस्समर्पणा

द्वैधंबलिनासहसंधिरबलेनसहविग्रहइत्यपरे
शत्रोर्वामूलप्रकृतिभिः सहसंधायशत्रुनासह
विग्रहइतिन्यतीयेशत्रुणावासंधिविग्रहस
मुदायेद्वैतोदुर्गेगोश्रयस्थाश्रयापारइतिवत्तथेमि
तिवत्तविधंद्वैधंबलिनासहविग्रहेणोच्छिद्यमान
स्यहीनशक्तेर्येद्वलवदुर्गेविजयिसमाश्रयणं
तदाश्रयः तस्यैववाबलिनः शत्रोः सेवयाकोषा
दिहानेनवाश्रयेणाश्रयइतिद्विविधआश्रयः
उक्तंच उच्छिद्यमानोरिपुणानिरुपायप्रति
क्रियः शक्तिहीनः संश्रयेतबलिनंधार्मिकंनृ
पमिति ॥ षडेति ॥ तिस्रः शक्तयः शक्ति
शब्दवाच्याइत्यर्थः शक्यतेनेनमनयाशक्तिः
शक्तेः किन्त तत्रप्रभुत्वसाधकत्वात्कोषदं
डौप्रभुशक्तिः उक्तंच कोषदंडबलंप्रभुः शक्ति
रिति विक्रमेणाश्वशत्रुयाविक्रमाणामुत्साहश
क्तिः उक्तंच ॥ विक्रमेबलमुत्साहशक्तिरि
ति संध्यादीनांसामादीनांचयथावस्थापने
नतत्वानबलंमंत्रशक्तिः पंचांगमंत्रोमंत्रश
क्तिरितितन्मायवीशेषसुगामंत्र[illegible]॥ होति ॥ नीति
वेदिनांनीतिशास्त्रज्ञानोदयादिभिः त्रिवर्गोन्यो
न्यापत्तधर्मकामार्थैरितिबाधयित्वेनीतिवेदिना
मित्युक्तेरष्टवर्गाणामपचयः क्षयः तेषामेवो
पचयोवृद्धिः तेषांनोपचयोनापचयः स्थान
मष्टवर्गः कृषिर्वणिक्पथोदुर्गंसेतुः कुंजरबंध
नं खन्याकरबलादानंशून्यानांचनिवेशनमि
ति ॥ सप्रतापःप्रभावश्चयत्तेजः कोषदंडजं
॥ कोशोधनंदंडोदमस्तदेतत्त्वातमेन्यमपिदं
डः ताभ्यांजायतेजोजायतेसप्रतापइत्यनेनपरमे

रा॰ सं॰
३११
277

तर्भावितत्वाद्धेतोरत्र हलस्योक्तिरिति च प्रतापः एवं प्र
भवत्यनेन प्रभवतेः कृत्यल्युटो बहुलमिति वा
ऽत्यात् प्रियाणीभवतीति च प्रभावः एवं प्रभव
श्रयित्वे पावमानादेः प्रथक्क्रमस्य परेणायत्त प्रा
णात्ययेप्यसह्यं तत्तेजः समुदाहृतमिति भर
तः हे १ ॥ सामदाने भेददंडावित्युपायचतुष्ट
यं साहसं तु दमो दंडः साम सांत्वमथो समौ भे
दोपजापावुपधा धर्माद्यैः परीक्षणं ॥ स्वा
संपादनकरणमुपाय उपेत्यनेन करणे घञ्
इतिकरणं भेदादीनामसर्थपरत्वद्योतनेन श
त्रोरमात्यादीनामुपायेन परतो विश्लिष्यात्म
सात्करणं भेदः भिदेर्भावे घञ् स त्रिधा तदुक्तं
च ॥ स्नेहरागापनयनं संघर्षोत्पादनं तथा
संतर्जनेन च भेदज्ञैर्भेदस्त्रिविधः स्मृतः ॥ शा
त्रोर्द्रोहाय शापथ्यमेवं कमसीषामेकमत्यं ज्ञात
मित्यस्यार्थेस्य कपटलेखादीनां योगात्समस्ति
प्रदेयणात्तराज्ञोऽनुपायिभृत्यस्नेहस्य परिजनानां
वप्रभोर्भेदेरपनयनमित्येकः अनुयायिनामे
वपरस्पराभिभवसंजननं संघर्षोत्पादनमिति द्वि
तीयः संतर्जनं भर्त्सनमिति तृतीयः दमनं दंड
घातिः जमं ताडुः सोपि त्रिविधः उक्तं च ॥ व
धोऽर्थहरणं चैव परिक्लेशस्तथैव च इति दंडवि
धानज्ञैर्दंडोपि त्रिविधः स्मृतः ॥ परिक्लेशो बं
धनताडनादिः प्रियवाक्यमर्थप्रधानसंबंधादिभिः
क्रोधोपशमनं सांत्वनं सामस्यति विरोधं योत्र त
कर्मणि घञ् सामसांत्वप्रयोगे सामसांत्वने मा
संदामन्त्रे मन्त्रित्वादिना निपात्यते सामदेत्यादि
शमयति विरोधमिति वा शीभवज्ञालव्यादिश्चि

तत्स्वं पंचविधं ॥ परस्परोपकाराणां दर्शनं गुणकी
र्तनं संबंधस्य समाख्यानमायत्याः संप्रकाशनं ।
वाचा पेशलया साधु तवाहमिति चार्पणं इति सा
मविधानज्ञैः साम पंचविधं स्मृतं स्वधनस्य पर
स्वप्रतिपादनं दानं यत्संप्राप्तधनोत्सर्गमुत्त
माधममध्यमान् प्रतिदानं तथा तस्य गृहीतस्या
नुमोदनं द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्तनं दे
यस्य प्रतिमोक्षश्च दानं पंचविधं स्मृतं १ ॥ श्र
त्येनमायामुपेक्षामिंद्रजालं च त्रितयमुपायेषु
तर्भाव्य सप्तोपायानाहुः उक्तं च ॥ सामदानं च
भेदश्च दंडश्चेति चतुष्टयं मायोपेक्षेंद्रजालं च स्व
सप्तोपायाः प्रकीर्तिताः इति तत्र मायोपेक्षेदंड
पकांतर्भावितत्वे इंद्रजाले च भेद इति ग्रंथकर्तुरभि
प्रायः एतत्पाठक्रमेणैव चतुर्थोपायस्याधेतत्वश
त्रोः सांत्वमपक्रियेति माघे हेतुश्चतुर्थोपायेनो
क्तः न्यायमात्रेणोक्तानामुपायानां पर्यायमाह
सेति ॥ सहो बलं तत्र भवं तत्र निर्दंतेवाऽणस्त
हसं दमनं दमः दण्डं नोदंतोऽपरेशास्येति दंडश
भावः श्रीणिदंडस्य ३ ॥ सामप्रागुक्तं ॥ भ्रष्टे
ति ॥ भेद उक्तः एवं उपोञ्जपनमुपजापः दंत्र
हे १ ॥ उपेति ॥ राज्ञो धर्माच्चैर्धर्मकामार्थभी
रमात्यादेः परीक्षणं भाववत्त्वनिरूपणमुपधाउ
पधीयते कुडित्ताना यउपसमीपे धीयते आरो
प्यते इति आतश्चोपसर्गे सा च धर्मादिभेदेन चतुर्वि
धा तदा भेदतो धर्मोपधापायेन भावतत्वं ज्ञात्वे प्र
हितेनाक्रम्य कश्चिदनन्यः धार्मिकोयं राजा तदेनमु
त्सृज्यस्यन्यं राजानमभिषेचयामोऽन्यं वा धार्मिकं
राजानं ब्रजामहे इति उक्तोयदि नमन्यते तदा सत्यं


धार्मिकोयमितिनिश्चयोधर्मोपधा तथाकोपधा
हेवूरूपनोत्पत्तिविषयेवनियोज्यश्रयेत्तायोंह्या
तायांयथल्लबः स्यात् तदातनस्याथैंशुचिलानत्ता
नेर्थ्योपधारात्ताउक्ताः परिचारकांतवैवेषिकोवा
लब्धविश्वासः प्रलोभयेत्तद्रूपयोवनवैश्ल्याया
दिफलानामेकथानेपत्त्यः प्रभवंती महिषीवा
कामयतेइलभश्च प्रच्छन्नप्रचारः सेनानीराज्या
श्रीरेववत्सपीनेत्युक्तेकामनिश्चतिविनिश्चयः
कामोपधाधार्मिकोयंराजानवद्रोहपरोऽतोयत्त
नवरत्तास्याचन्द्रान्यराज्ञानेवंशहित्यसमर्थया
मीत्युक्तोयदिनमन्यतेतदातस्यभवतिनिश्चयो
भयोपधा पंचत्रिंशषडक्षीणोयत्तलीयाद्यश्नो
वः विविक्तविजनछिन्ननिःशलाकाकेवलार
हः रहश्चोपांशुचालिंगेरहस्यंतद्भवेत्रिषु ॥
अषडक्षीणाद्याः शलाकांतासिषुलिंगेषुवर्त्तंते
अषेतियोद्वाभ्यामेवक्रियतेनतृतीयादिनागो
चरोज्ञानविषयः अविद्यमानानिषडक्षीणि
त्वषड्ब्रीहौसमन्तात्नोः स्वांगात्तच्छ्वषडक्ष
अषडक्षाणितेनगवकर्मेत्यादिनाश्वार्थेखः अष
डक्षीणः विविक्तंतिपृथग्भवेतिजनरश्रेतिप्
कर्मकत्वात्प्रपिकरणेक्तः विविक्तः विविक्तोदेशो
विविक्ताभूमिः विविक्तंस्थानं विविक्तादिचत्वा
रोपिविलिंगतोऽत्राविगतोजनोस्मादितिजनः ख्या
यतेआविग्रियतेइतिछन्नः अपवारितोवादेशोन्नमो
तिनिपातनाच्छन्नः शलाकाशारिकामदनशा
रिकेतिपर्यायः शल्यघावच्छलाकास्याच्छरो
मदनशारिकेतिमालव्यादौरभसः श्रुतिश्चभ
निर्गताशलाकाप्यस्मादितिनिःशलाकाः तथा

समुच्चयेरहितमत्ररहेर्भूतअरहेक्षित्यमरन्त रमे
तेरात्राविति रमच्छेत्युत्तरहश्चोत्ताहेशः रहः रहो
तिभुवनेपिस्यादुहोरहेनपुंसकइतिरभसः
अतएतदनव्ययंहितीयंत्वव्ययमितिआह अ
लिंगेइति अलिंगेअव्ययत्वे ॥ विजनत्वाउप
गताश्रयावः किरणाअत्रउपांशुतालव्यशोअपवि
जनस्य वेति ॥ रहोमवेरहस्यादिगादिभ्योयत्
॥ समौविस्रंभविश्वासौ ॥ स्रंभुविश्वासेइत्या
दिर्वर्णादेशनायादर्शितः अमप्राणनेतालव्या
दिः विस्रंभः विश्वासः द्वाभ्यांचश्च हे विश्वासस्य
२॥ भ्रेषोभ्रेषोयथोचितात् अभ्रेषन्यायक
ल्पास्तुदेशरूपंसमंजसं ॥ यथोचितात्यथा
प्राप्तात्भ्रंशोधःपतनंभ्रेषुसेचनेभूर्धन्यातात्
वत्भ्रेषः अभ्रेषइतिनभ्रेषोअभ्रेषः नियतमीय
ते३सोपरिणोपरिणोर्थेन्यायः कल्पनेकल्पः
कृपेर्थेअलत्वेकल्पः धर्मशास्त्रेदिश्यतेकर्त्तव्य
तयाकथ्यतेदेशः कर्त्तरिचेतिछन्नःदेशोरूपमस्ये
शारूपंदिश्यमानस्योचितस्यरूपंप्रशस्तेदेशाने
वासस्यकृत् संगतेवोजसातच्चमत्रकृत्वोनपुंसक
स्येतिकृत्वत्वेसरमीसमंजसंचेतिद्विदंतोपुसमे
हात् समंजसंद्विदंतं पंचोचितस्य ५॥ फलं
मौपयिकंलभ्यंभजमानाभिनीतवत् न्याय्यंचत्रि
षुषट्संप्रधारणातुसमर्थनं ॥ कल्पतेउपायैः
संबध्यतेकल्पतेः कर्मणिक्तः कल्पंअपायेत्वनेनोपा
यः उपायएवौपयिकं विनयादिभ्यउपायाट्टक्
तिठक् कृत्वत्वंचऔपयिकंलभ्यशक्यंलभ्यमा
पयादितियत् भजतेफलमनुरूपमिति भजते
क्वीत्वेवयोवचनेत्यादिनाशानजित्यन्ये फला

रा॰ मं॰
२९८
२२९

भिनुक्तमभिनीतमभिनीतं संस्कृतेवन्याय्येवाम
र्थेत्रिषु त्रिलिङ्गः न्यायादनपेतं धर्मपथ्यार्थेति
यत्न्याय्यं चकद्वयः षड् त्रिषु षड्न्यायगता
इत्यादेः ६ ॥ समिति ॥ इदमुचितं नवेति नि
श्चयः संप्रधारणा संप्रधीयतेऽनया धारणोद्यतो
णान्तात्कर्तृसमर्थीर्थे भावे ल्युड् समर्थनं नि
र्धारणं द्वे २ ॥ अववादस्तु निर्देशो निदेशः शा
सनं च सः शिष्टिश्चाज्ञा च ॥ अवलम्बनेका
मवलम्बवदनमववादः भावे घञ् निर्देशः का
र्येदेशः घञ् एवं निदेशः शास्तेः ल्युट् शासनं
क्तिन्ताविभ्य इति शास्तेः क्तिन् उपधाया इत्वे
बाडलकाद्वेति णिरिति प्रत्यये शास्तिरित्यपि
माधवी आज्ञातश्चोपसर्गेऽङ्प्रत्यय आज्ञा षडाज्ञा
याः ६ ॥ संस्थातु मर्यादा धारणा स्थितिः ॥ सं
तिष्ठतेऽनया सम्यगवस्थानं वा संस्था एवं व्यवस्थ
न्यासोऽप्युपमथ्य इतिवत्पुंत्वं तमाह नैवाडल्या
तेऽङ् एषोऽस्मारिः पर्याङ् एवं डाज्ञो नैकन्याविप
र्थेवा मर्यादाग्रन्थः स्वामीतमाह नेः तत्रावस्थित
त्वात् एवं वदङ्नेह कष्टदेसेकावादेशा इतिवा
र्थेति सीमाष्टैः ख्यायंतत्र धीयते मर्यादेति स्वामी
रयति धर्मधारणानेयादि स्वाल्युड् कचुवाति
त्यत्राधिकरणे क्तिन् स्थितिः ॥ चत्वारि न्यायप
थस्थितेः ४ ॥ आगोऽपराधो मंतुश्च ॥ एति गा
च्छतिइष्टं तेन आगो अपराधे रत्यलक्षणधातो रा
देशश्च आगाः अगति गच्छति वस्तुनिर्भर्त्सिति इत्य
क्षनग्नागा इति क्षन्त्याकारयः छामकममिति मंत
मिति क्लीबत्वेसांतमागः सोढाङ्शातमागोसि
इति मायात् अपराधनमपराधः घञ् मन्यतेनि

ष्ठिनोतिव्यवस्थापयत्यः कार्यं जेतवेतत्वमेतः
त्रीण्यपराधस्य ३ ॥ समौ तूद्दानबंधने ॥ दो
अवखंडने भावे ल्युड् उद्दानं खंडनेनत्रद्वेदानम
स्मात् ह्रीयतेवानेनेति तद्दानं बध्नातेल्युड् बंधन
नं द्वे बंधनस्य २ ॥ द्विपाद्यो द्विगुणो दंडो
अपराधेषु द्विगुणो यस्तात्हदंडो द्विगुणो दंडो ॥
द्वाद्विपाद्यो द्वौ पादौ परिमाणमस्य पणपादमास
शत्तादयत्पादस्य प्राण्येतन्मात पदत्यन्तदर्थे इ
तिरूपश्चावः पदं १ ॥ भागधेयः करो बलिः
॥ भागधेयः भागो वोक्तः कार्यते प्रत्येकं विधि
यते किरतेरक्तु करः प्रजाभ्यो निकारः कारोव
धेनिश्चयेचबल्लीत्यत्वेयताविपर इति विश्वः बलिः
प्राग्वक्तः त्रीणि कर्षकादिभ्यो राजग्राह्यभागस्य
३ ॥ घट्टादिदेयं शुल्कोऽस्त्री ॥ घट्टास्खलने
घट्टतेत्रघञ् घट्टो राजग्राह्यग्रहणस्थानादि घ
ट्टोवर्त्मतत्रतरत्ताद्यर्थं राजदेयभागः शुल्क इति
माधवी आदिनागुल्मप्रतोल्यादिग्रहः शाल
तिप्रतिबंधोनेन शुल्कः शुल्कवल्कोल्का इ
तिनिपातितः घट्टादौ देयं घट्टादिदेयमिति स
मासः आङ्क्तः शुल्कास्त्रिखंडे आम्नायश्च मणाः शा
पथ शुल्काविति तालव्यशः ह्रेदेवताभ्योमि
त्रादिभ्यश्च प्रीत्या प्रशस्तं दीयते तस्य पाङ्ड
इति ख्यातस्य १ ॥ प्राभृतं तु प्रदेशनं ॥ उ
पायनमुपग्राह्यमुपहारस्तथोपदा ॥ षट्क
मेवपाड्डस्येति तद्भृत्याकारयः तथा च उपा
यनमुपग्राह्यं प्राभृतं चोपदा स्त्रियामित्यमर
माला उपसमीपमीयते अर्थ्यते प्राप्यते उप
हरेऽदिंडोयते वीकर्मणि ल्युड् उपायनं उपह



रा॰ मं

२८०
280

ह्यते उपग्राह्येणेत्व उपक्रियते कर्मणानेन उप
ग्राहः उपदीयत इति उपदा आतश्चेति कर्मणि अङ्
चत्वारि उपायनस्य ५ ॥ यौत
कादि त्रयद्देयं सुदायो हरणं च तत् यतकं यो
नि संबंधस्तत्र भवं यतयोर्वधूवरयोर्वैदिमित्या
ण् यौतकं यतकं यगालेयकक्रौ यौतकं मषाये
पि चेति रभसः आदिना व्रतमित्यादि ग्रहः अव
नेरिचेति कर्मणानेन सदृशीयत इति सदाय
इति पाठे इत्यन्ये क्रियत इति कर्मणि ल्युट् हर
णं यौतकं समकारमध्यमपि यौतकं चतरिति
वाचस्पतिः हे कन्यादानकाले जामात्रादिभ्यो
व्रतमित्यादौ च दीयमानद्रव्यस्य २ ॥ तत्का
ले तु तदात्वं स्यात् ॥ स चासौ कालश्चेति त
त्कालो वर्तमानकालः तदेतस्य भावः तदात्व
हे वर्तमानकालस्य २ ॥ स्यादायतिकाल उत्तरः
॥ उत्तर आगामिकालः आयाम्यतीत्यर्थे यते
-- तिरिति वाङ्लकात्यातेरपि इति: आयति
स्त्रीलिंगा आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामि
कालयोरिति मेदिनिः एकं २ ॥ सान्दृष्टिकं
फलं सद्यः ॥ सद्य तत्काले व्यापारानंतरमे
व यत्फलं तत् सान्दृष्टो प्रत्यक्षे भवं सान्दृष्टिकं
ध्यात्मादित्वात् ठञ् ॥ तदर्कः फलमुत्तरं ॥
तदर्को तु उच्यते तदर्कः उत्तरभाविनः कर्मफ
लस्य १ ॥ अदृष्टं वह्नितोयादि ॥ भय
ति वक्ष्यमाणेन प्रत्येकं संबध्यते पीडाकरं व
ह्नितोयादि भयहेतुत्वाद् इत्यर्थः पीडाकरो
ऽत्यन्तः तोयमतिवृष्टिरनावृष्टिरूपमादि
ना व्याधिमकरमूषकशलभशुकादिभूकंपो

ल्कादिग्रहः ॥ दैवकृतमदृष्टं दैवं तस्मादिति व
ह्निः तोयादि दैवकृतत्वाद् अदृष्टमुच्यते तदुक्तं
॥ हुताशनो जलं व्याधिदुर्भिक्षं मरकस्तथा १
अतिवृष्टिरनावृष्टिर्मूषकः शलभादयः ॥ दृ
ष्टं स्वपरचक्रजं ॥ चक्रं सैन्यं राष्ट्रं च स्वचक्रात्
स्वबलात् परबलाच्च परराष्ट्राद्वा चौराजावि
कारैः परचक्राच्च यद्दाहविलोपादिभयं तद्दृष्ट
मुच्यते ॥ असत्कारश्चदंडश्च परचक्राणि त
स्कराः राजानीकप्रियोत्सर्गो दृष्टं तन्मानुषं
विदुरिति अमरशेषः असत्कारोऽभिभवः दंडउ
ग्रोऽन्यायः राजसैन्य राजवल्लभयोः कृत्सर्गो नि
यमनं ॥ महीभुजामहिभयं स्वपक्षप्रभवं भ
यं ॥ स्वपक्षात् स्वसहाया जातं भयमहिभयं अ
हीनां गरदस्य त्वादाहतां कारत्वाच्च साधर्म्यादह
ह्रि वा हस्ततो भयं महिभयमुच्यते अहिभये
नैवमहीभुजां संबंधोऽन्हदाहदहभयाभ्यां तेत्व
त्यस्याभिभवतः पक्षः सप्तविधिः ॥ निजोत्थ
मैत्रश्च समाश्रितश्च संबंधतत्कार्यसमुद्भवश्च
भृत्योऽसदृहीनो विविधोपचारैः पक्षस्तु पाः सप्त
विधं वदंति इति ॥ प्रक्रिया त्वधिकारः स्या
त् ॥ राजादीनां चामरधूननछत्रधारणादि
व्यापारः प्रकर्षेण क्रियते प्रक्रिया कृञः ष
दिक्षिपितिति दिवादेशः टाप् अधिक्रियतेऽधि
क्रियायां क्रियते संपाद्यते वऽनेन अधिकारः द्वे २ ॥
चामरं तु प्रकीर्णकं ॥ चमर्या मृगभेदस्येदम
ण् चामरं चमरः प्राण्यङ्गः अप्राण्यंगणि चामरं चाम
राढार्थं तापि चामरं चामरं बालव्यजने स्त्रीमतश्च
कमिति अमरसात् प्रकीर्यते विक्षिप्यते स्म स्वार्थे

रा॰
मं
359
281

कम् प्रकीर्णकं द्वे चामरस्य २ ॥ नृपासनं त
यद्भद्रासनं सिंहासनं च तत् ॥ नृपस्यासनं नृ
पासनं भद्रं श्रेष्ठं च तदासनं चेति तद्भद्रासनं द्वे
मण्यादिकृतराजासनस्य २ ॥ हैमं छत्रं त्वात
पत्रं राज्ञस्तु नृपलक्ष्म तत् ॥ तन्नृपासनं हैम
सुवर्णघटितं सत् सिंहस्याकारः सिंहः तस्या
धानमासनं सिंहासनं साधनजनकत्वात् सिं
हवासनं सिंहासनमित्यन्ये एकं १ ॥ छे
ति ॥ छादयति छत्रं छत्रं इसंज्ञकिम् चेति
फलत्वेनेडुषिकृतौ तोडभावः छत्रं आतपात्त्रा
यते स्वपीतिकः आतपत्रे द्वे छत्रस्य ॥ तद्
छत्रं यदि राज्ञस्तल्लक्षणमौचित्यात् शुक्लं कनक
शुक्लं च नृपस्य लक्ष्म चिह्नमुच्यते तथा च सु
वर्णदंडैकमिताातपत्रित त्वलस्य तापावलि
कीर्तिमंडल इति नैषधः ॥ भद्रकुंभः पूर्ण
कुंभो ॥ भद्राय मंगलाय पिनतः कुंभः भद्रः श्रे
ष्ठश्चासौ कुंभश्चेति भद्रकुंभः एवं पूर्णकुंभः द्वे
राज्याभिषेकाय नानातीर्थादिजलपूर्णकन
ककुंभस्य २ ॥ भृंगारः कनकालुका ॥ बि
भर्ति उदकं भृंगारः भृंगारभृंगारौ चेति भृंगार
श्च भृंगारामश्च निपात्यते कनकस्यालुका क
केरी कनकालुका कर्पर्योल्लुगले लतिकेतिव
त्वात्ते स्वार्थे कन् द्वे सुवर्णघटितजलपात्रस्य
२ ॥ निवेशः शिबिरं षण्ढं ॥ निविश्यते स
स्यामते निविशंते चेति वा घञ् निवेशः शाव
तौ शिबिरवत्किरचुश्यत्र इत्वच शरतः चशो ग
शिविरवत्किरचुर्वाशिवि रत्नालक्यादि शिवि
मंतः ५रे पोत्यन्ये ॥ शण्ढ इति क्लीबलिंगः स्यो

र्धः स्कंधावारोप्यत्र द्वे आगोलकसैन्यवसतेः ॥
सज्जनं रूपरक्षणं ॥ सज्जेते निर्भया भवत्यानेन
सज्जीभवनं जन्यते वा ॥ नेन सज्जनं घमगतो फलो
जपूरूषीतिमस्यद्वः स्तोष्कुनाष्कीतिस्यजः २
॥ सज्जनं प्रमाणमुपरक्षते ॥ नेनात्रवाउपरक्ष
णं गुल्मोप्यत्र द्वे सैन्यरक्षणाय नियुक्तप्राहरि
कादिनामस्य २ ॥ हस्त्यश्वरथपादातं सेनांगं
स्याच्चतुष्टयं ॥ हस्त्यादिचतुष्कं सेनांगं स्यात्
पदातीनां समूहो भित्यादिना हण्पादातं ततो
द्वंद्वे द्वंद्वश्चेत्यादिनैकवत्वे क्लीवत्वं नाविकटवि
कादीनां सेनांगत्वेन प्रसक्तावं तर्भावः नौकाना
मल्पसंचारित्वादृश्येष्वंतर्भावः महिषादीनां च
तच्छटत्वात्कृताश्चेष्वंतर्भावात् एष्वरत्नहेत्वः १
एकं १ ॥ दंती दंतावलो हस्ती द्विरदोनेकपो
द्विपः मतंगजो गजो नागः कुंजरो वारणः करी
इभः स्तंबेरमः पद्मी यूथनाथस्तु यूथपः मदो
त्कटो मदकलः कलभः करिशावकः २ प्रभि
न्नो गर्जितो मत्तः ३ समावुद्वांतनिर्मदौ २ प्रश
स्तदंतयोगात् दंतिशब्दयने इनिः दंतीप्रवदंतवि
श्वास्तेनायामिति वलच् वलइतिसौत्रैः दंताव
लः हस्तकार्यकरत्वात् शुंडापि हस्तः करः त
द्योगाडस्ताज्जातावितीनिः हस्ती एवं करी च यो
गिकत्वात्स्पवत्त्रोच्यते नान्यः द्वौ रदौ दंता
वस्य द्विरदः द्विरदः करेणमुखेन पिबति स्वपी
तिकः अनेकपः द्वाभ्यां पिबति द्विपः एवं वल्कः
मतंगात् हर्षे जातः पंचम्यामजातावितिडः मतं
गजः गजति माद्यति ग्रचुगजमदे गजः नगो
हृतः सइववहम्पत्ते शेषात्मनागः पर्वतजातत्वा

त्कं तोदंतो हन्त्रस्तुतयोगादिति शायते वेत्स्यान
गकुंजेत्याहिनादः कुंजरः कौ जीर्यति एषोरवा
हिर्वावारयतिपरबलं ल्गुः वारणाः पतिपरव
लामिमुखं इणाः किरिति भः इभः स्तंभेरमा
दिरुक्ष्वरमते स्तंभमकरणीयोरपि जपोरितिश्रवु
हूलटंतादिलल्लकुस्तंभेरमः पद्मोविंदुजालकं
तद्योगाहुस्तर्थेइनिः पद्मी पंपरुटशाहस्तिनः
१५ ॥ येथेति ॥ वनकरिणां एयूथस्य संगस्य
योनाथईश्वरः महाबलत्वात् संघं यपातिश
तष्टेतिकः इयपः द्वे एयच्छक्रेकरिणाः २ ॥
मेति ॥ मत्तेप्रौंडोत्कटस्तीवइतिकथ्यते म
देवटानाम्बुनाउत्कटो मत्तः मदोत्कटः मदंक
लयतिसंप्रत्येकप्रकाशयतिकर्मणा मद
कलः द्वे उन्मदस्यहस्तिनः २ ॥ करिणःशाव
कःपोतः ॥ कल्पते विनैवबंधनं हिंख्यते कल
तिलत्वेपेकीर्यतेहिंख्यते वाकुविलेपे कलभः
प्रागुक्तः सवपंचविंशत्यव्दपर्यंतं कलभउच्य
ते द्वे २ ॥ प्रेति ॥ प्रकर्षेणाभिन्नो मदेन सं
गतः प्रभिन्नः गर्जेशब्दे मत्तो गर्जतिस्मगर्जि
तः एवं मत्तः त्रीणिक्षरन्मदहस्तिनः ३ ॥ से
ति ॥ तद्धमतिस्मामदं तदा तो गलितमदः ॥
हास्तिकं गजताहृदे ॥ हेतिहस्तिनांवृंदंश्रवि
तहस्तिधेन्वोः ठगितिटक् हास्तिकं गजाशेति
समूहे उल्लगजता द्वे २ ॥ करिणी धेनुकावशा
शा ॥ करयोगात्करिणी धेनुरिव वत्सवसाध
नात् स्वेप्रतिकृतौ कन् धेनुका उच्यते कामय
ते वशिकरिणी श्लेख्य वशिकामयतेः विवाव
शातालव्यशा वशावेध्यासुतायोशास्त्रीगवीक

रिणीधेनुरितितालव्यांतेषु विश्वात् त्रीणिहस्ति
स्त्रिन्याः ३ ॥ गंडः कटः ॥ गंडः प्रागुक्तः क
टति वर्षति कटो वर्षावरणयोश्च पुकटः द्वे गं
डकपोलयोः २ ॥ मदोदाने ॥ माद्यत्यनेन
मदो हर्षे मदोऽनुपसर्गे इत्यप् मदयति वा चुम
दः द्यति खंडयति अनेनदो अवखंडने ल्युट्
दानं द्वे २ ॥ वमथुः करशीकरः ॥ वम्यतेउ
द्गीर्यत इति कर्मणि त्विति अथच् वमथुः का
रिकरान्निर्गतो जलकणो वमथुशाह्ववाच्यः
द्वे २ ॥ कुंभौतु पिंडौ शिरसः ॥ करिशिरसो
वयवौ पिंडाविवोन्नतभागौ कुंभशाह्ववाच्यौ के
नमदजलेनतन्ध्यते एर्ध्यते तत्स्म एरणोकर्मे
णिचत्र शाके धादित्वात्पर्व रूपे पिंडितः संहतो
भवति भडिपिडिख्याते पचाद्यच् एकं १ ॥ १
तयोर्मध्ये विडः पुमान् ॥ तयोः कुंभयोर्मध्य
भागो मर्मस्थानत्वात् वेटुं कुशाद्यातमत्र वि
द्यतें कुशाद्यातेन भिद्यते विद् भेदने इत्यतो
वाउणादिकः क्तः विडः एकं १ ॥ अवग्र
हो ललाटं स्यात् ॥ अवगृह्यते अंकुशेनाऽवग्र
हः ग्रह ग्रहे कृत्यप्रहीर्वेश्च न्वाः गजालिके ह
ष्टिबोधे प्रतिबंधे प्यवग्रह इति रुद्रः अवग्रहस्था
नेःस्वते चः श्रेकुशादीनां करीअत्र हस्त्येतिच्छ
त्र अवग्रहो हड्डिमानितिख्यातमस्ति एकं १
॥ ईषिकाक्षिकूटके ॥ अक्षिकूटकं चक्षु
र्गोलकं इष्यते मदहस्तिदेहेनिमग्नत्वात् प्रयत्ने
नलभ्यते ईषगतिहिंसादानेष्ववारक
त्रितिप्रकृतेईषेः कित्तकस्वेइतिरुकन्प्रत्य
योधातोकस्वत्वेवईषीकाकस्मादिरहोचेमध्या


ईषालांगलकीलिकामाइवार्थेईषिकेतिस्या:
मौ ईषगतीत्यादिधातोः एवुलितिशाहिका:
सर्वत्वेपिइषीकाइत्यादिदीर्घमध्येति पे
षीकमसस्त्रमपिकृत्यतदातमस्तोतिमुनावि:
तस्मिन्नास्यदिषीकांखगमोगमावबोधितइ
तिरक्तः पर्क २ ॥ अपांगदेशोनिर्याणं ॥ क
रिणामपांगदेशोनिर्याणंशाहवाच्यः निर्यां
त्यःनेनाखुमरदजलंवाल्मुदिनिर्याणंकृत्यव
इतिणत्वं पर्क २ ॥ कर्णमूलेतुचूलिका ॥
चूलस्यलतमुक्त्वायेसंज्ञायामितिएवुलचू
लिका पर्क २ ॥ अधःकुंभस्यवाहित्थं ॥ कुं
भोत्रवातकुंभः वाहित्थंवातकुंभावइतिभाग
रि: सचललाटाधोभागइतिस्वमूत्यादयः त
स्याधोभागोवाहित्थंहित्यहावकरणोभावे
नहित्योविलासः वातस्यहित्योनैरुक्तलो
पः मरंचावर्णवहतिइतिणिनिः वाहीतवीत
इतिनैरुक्तः तस्यतः वाहित्थंइतिवा २ ॥ प्र
तिमानमधोस्ययः ॥ अस्यवाहित्थस्याधोभा
गोदंतयोर्मध्यभागः प्रतिमानमुच्यते प्रतिमी
यते:नेनइतिमिन्प्रक्षेपणेमीनातिमिनोतिदी
तोल्यपिचेत्यात्वंदेशोनियमात् मानेप्रतिगतं
प्रतिमानमितिवाप्रतिमानेप्रतिच्छायागज
दंतांतरालयोरितिरुद्रः ॥ आसनंस्कंधदे
शःस्यात् ॥ आस्यतेःत्रासनंगजस्कंधैकदेशः
द्वे २ ॥ पद्मकंबिंदुजालकं ॥ मुखादिस्था
बिंदुसमूहः शोणितकर्णत्वात्पद्ममिवकन्
पद्मकंद्वे २ ॥ पक्षभागः पार्श्वभागो ॥ इति
नोपार्श्वभागः पक्षभागउच्यते पक्षतिपरिग्र:

लोतिशाय्या:॥ सनेनपक्षपरिग्रहैकार्णोच्य
द्वे २ ॥ दंतभागस्तुयोग्रतः ॥ अग्रतोयोभा
गः सदंतसंहितोमुखस्यभागोदंतभागः शा
कपार्थिवादिः मुखतःस्कंधपर्यंतोयोःग्रभागः
सदंतसंनिहितत्वात्दंतस्यभागोदंतभागइ
तिविग्रहः ॥ द्वौपूर्वपश्चाजंघादिदेशौगात्रा
वरेक्रमात् ॥ गजस्यपूर्वैःग्रिमेजंघेअग्रादिदेशौ
यस्यतद्गात्रंपश्चात्पश्चिमेजंघेग्रादिदेशोऽवगा
त्रंपश्चाजंघयोरादिदेशःवरंगात्रावरेएवंप
श्चात्पादयोः परिभाषितेइतिभागुरिः केचित्रा
ड: अग्रेविद्यमानहर्षमवरमधस्त्वमात्रमिति
गजांत्यजंघादिदेशोवरंस्याखुरमेत्रिषितिरुद्रः
द्वौपूर्वपश्चाजंघादिदेशौगात्रावरेनेतिरभ
सः अतोगात्रावरेदार्थेतेवरपभेदाख्यानयोः
स्त्रीनपुंसकत्वमितिस्वभूतिः अपराप्रवर्गेम
ध्यात्तथावमाद्वेइषः बडापराणिपरितोनि
गडान्यलावोदितिअपरंतुजगार्थेस्यात्पश्चा
द्भागेचदंतिनामितिविश्वः ॥ तोत्रंवेणुकमा
लानंबंधस्तंभे ॥ तुद्यतेःनेनतदृश्यनेदा
श्रीत्यादिनाष्ट्रन् तोत्रंवेणुनातिहृत्रंनिहृत्रं
दहूनादिभ्यइतिहस्व वेणुकंकेचित्तुवेणुकं
इतिपाठेसंज्ञाएवंकनाहस्वभावः द्वेतोरर
नटंडुस्य २ ॥ आलेति ॥ बंधनस्तंभेइतिस
माहारेद्वंद्वःतेनबंधनेबंधनस्तंभेवालानं द्वे
२ ॥ अथशृंखले अंडकोनिगडोस्त्रीस्यात् ॥
शिंजानाःस्खलंत्यनेनशिंजानाःस्खलतिवा
इषोःखादिः शृंखलःशृंखलाएंस्कदीवसवं
धेचनिगडेत्रिषितिमेदिनेत्ताल्लक्ष्यादिग्रंथेते

बा॰
मं॰
२५८
284

बध्यतेऽनेन अदिबंधने ग्रे हस्वन्म अंदुकंदीदिपि
रितिकप्रत्ययः निनयादित्वाहकिकादेशेशो
ण इति हस्वत्वे च अंदुकः निगद्यते बध्यतेऽने
न निगड इति वा ह्वजर्थे कः पचाद्यच् वा द्वौ स्त्री
निगडस्य ३ ॥ अंकुशोऽस्त्री सृणिः स्त्रियां ॥
अंक्यते गम्यतेऽनेन अंक्यते वा अनेन अंकगतौ अवि
लक्षणे पानसिवर्णो सीत्यादिना उश्मः काशा
काशांकुशाइति शमेद्रात्तालव्यादिः सरतिम
नेऽस्यानेन गच्छति सृणिः सृहकिभ्यो किदिति
निः सृहिंसायां सृणिर्वा णिहस्तिपाद्यर्मेहा
यइतिनिः गुणश्चेति सृणिस्तालव्यादिः सृ
णिरंकुशवाची वकाशत्त्वाहणवाचकः इति
शभेदः स्त्रियामेकदेशेन स्त्रीपुंसशाहः स
मनायेलभ्यतेतेन आरत्वमत्रमवमन्यशर्णि
शिलाश्रमितिमाद्धेसृणेः पुंस्त्वमपिइतिम
भूत्वाद्वयः स्त्रियामिति प्रायिकत्वाउक्तंइति
त्ववयं हेरंकुशस्य २ ॥ दृष्याकक्ष्यावरत्रा
स्यात् ॥ दृष्यते पीयते हह मांसेनाहृष्यता
नीयते हवपानेकर्मणि ऋञ्जर्थेकः प्रहृषपा
लनेवासर्वस्वेचहृषयाचनेहस्त्रक्तंकक्षः प्रा
गुक्तः कक्षेभवाविद्यमानाकक्ष्याशरीरावय
वाद्यत् कक्ष्यासांतस्याकोषांतरे भुलांतेस्त्र
क्तावियतेहजःत्रचूवरत्रा त्रीणिकाक्ष्यहृदं
तिख्यातायाः ३ ॥ कल्पना सज्जने समे ॥
कल्प्यते आरोहणसामर्थ्यंप्राप्यते अनयाह
स्तिणांताक्तचूभावेवाकल्पना एवंसज्जनाव
हेनायकस्यारोहणायगजसज्जीकरणस्य २
॥ प्रवेण्यास्तरणंवर्णः परिस्तोमः कुथो द्वयोः

॥ प्रवीयते प्रकर्षेण आम्यते उपवेशनायेति
यते वीगति प्रजनकांत्यसनखादनेषु एवी
कवेणिवत् आस्तीर्यते आच्छाद्यते गजः एवी
मनेन आस्तीर्यते गजपृष्ठे वा आस्तरणं त्रियुः
ते आच्छाद्यते गजपृष्ठमनेन हृपवृहशिभ्यो
मत्ववर्णः बहुवर्णयोगाद्वा आश्च आद्यच्वरहू
पवात्यरस्तीर्यते सोमवमेनउपसर्गे शतिह्वप
कत्वात् परेनोपसर्गादिनाघत्वं परिस्तोमः कु
यते विद्धकम्बलत्वेन शाह्यतेशाहे पवितंहि
वचिसिचिभ्यस्थक् बाउलकाद्दन्त्यस्तोपिष्ठ
कुथः कुथप्रियपृष्ठभावे कुथ्यतिगजपृ
ष्ठास्पृष्ठमभवति इगुपधात्कः कुथः द्वौ वेपि
स्त्रीप्रवेणिनी कुथ्य त्रिषिति बोपालितः पंच
गजविद्धकम्बलस्य ५ ॥ वीतंत्वसारंहस्त्य
श्वं ॥ असारंफल्गुद्यात्वमंहस्त्यश्वं वीतमु
च्यते वेत्यायोग्यत्वाद्गच्छति स्मकर्तरि क्तःविं
हडमितंगमनमस्यवावीतं एकं १ ॥ वा
रीतुगजबंधनी ॥ वारयति गजान्वार्यंते
वागजाअनयावारिवशिरपियजिवाजिभ्रजि
समिहनिवाशिवादिवाचिभ्यइत्रवारिः हृदि
कारादितिङीपिवारी स्यात् गजबंधन्यां फलम
पियोषितिवारिवागजबंधन्योः स्त्रीक्लीबेस्तु
निबालकेइतिमेदिनिः बबंधने बध्यते स्त्री
बंधनीगजस्य बंधनीगजबंधनी गजबंध
न्याहे २ ॥ घोटके पीति तुरगातुरंगाश्वतुरं
गमाः वाजिवाहार्वगंधर्वहयसैंधवसप्तयः
घोटतिभ्रमोपरिवृत्यलृहतिकोटपरिवर्तने
पचाद्यच् घोटः ततः स्वार्थेकः घोटकः घोट



ग॰
५॰

सैंधवगांधर्वौ हयवाजितुरंगमाइतिरभसः॥ बा
लिवाः पिबति अधानेपिबतेः क्विपू कृते वैलि
क्विपू पीतिनोष्ठेस्त्रियांपानेइतिमेदिनिः पी
तिः पानेतुरंगचेतिविश्वः पीतंपानंहतादि इ
त्याभ्यवहारः तद्योगाद्यन् पीतीनांतोवा तुर
त्वरणे इगुपधेतिकः तुरन्त्वरावान्गच्छ
तितुरगः भुजगवत्डः अश्नुतेरेकवचनत्वा
द्रुक्तेवड्भूभागव्याप्नोति अश्वव्याप्तौ अश
पृषिलटिकसिखेटिविशिभ्यः क्वन् अश्नाति
वासादिकमित्यन्येअश्वः तुरंगमोभुजंगमव
वत्तवजतिगच्छतिणिनिः वजगतौ वाजी
वाजः पक्षः तद्योगात्वाजी एवंमस्थाः सप
क्षाश्चासन् ततोदेवाभ्यर्थितेनशालिहोत्रमु
निनाप्रेरितेनेन्द्रेणपक्षाच्छिन्नाइत्यागमः इ
तिवा वाह्यतेवहेर्णिंतादेरचुइत्यनेवानेन
वजिवाहः वाहप्रयत्नेवाहविलोडनेवाव
मेणिश्चजूपचाद्यच्वावाहः अर्छतिअर्व
गतौस्नामदिपद्यर्तिपृशकिभ्योवनिपूअर्व
तिगच्छतिअर्वगतौबाडलकाहतिपृषादे
पः अर्वेतिरभसःतिः गंधर्वदनेगंधनेगंध
गंधोहिंसागंधंगंधायवाःवेतिगच्छतिकर्म
ण्यण्पचाद्यच्वाशकंधादिभ्यः गंधर्वाः ह
यतिगच्छति हयगतौहिनोतिवाहिगतौप
चाद्यच्हयः स्त्रियांहयगवयेत्यादिनाङीपू
हयी सिंधोर्नद्भववाहे शोणिसिंधुः अश्व
भवश्चेत्याणिवरणादिभ्यश्चेत्याणत्वपृतता
तत्रभवइत्याण्सैंधवः सिंधुर्नामनदभवोवा
नपदः सिंधुः ततोभवार्थेकच्छादिभ्यश्चेत्याण

सैंधवः इतिएवंटीकाकाराः सप्तिः सेना
यांसमवैतिसपसमवायेबाहुलकात्तस्य
स्मिन्कितिः सप्तिः त्रयोदशघोटस्य १३ ॥ आ
जानेयाः कुलीनाःस्युः ॥ प्रधानाश्वभूमिभ
वाः स्युःजाततयोविकारिणश्चकुलीनाः उक्तः
शस्त्रप्रहारवत्ताअपिसंग्रामेमार्दनेयेनज
हतितेअतिस्यएवंवाचत्वातआजानेयवा
तएषोटवादिरितिस्वामीमाधवीआजनमा
जः क्षेपः अजगतिक्षेपणयोः घञ्आजेन
क्षेपणेननेयाः प्रापणीयाः अन्येषामपीति
दीर्घः स्त्रीचोटिसाजानेयाइतिसर्वेस्वाहयः
अश्रुतिव्याप्याजवनेवोढार्षंयानेयातिः
प्रापयति एषोटवादिवी अयंकुलीनमाजा
नेयंभावेकिशोरकेअर्ववतेइतिनाममाला
यामाधीमाहस्म्रटीवोरिः शक्तिनिर्भित्वहि
हयाः स्खलेतस्थुपदेपदे आजानेतियतः
संज्ञामाजानेयास्ततःस्मृता इत्यश्वशा
स्त्रेप्रशस्ताश्वस्यद्वे २ ॥ विनीताः साधु
वाहिनः ॥ विनीयतेस्मविनीताःस्पृशि
क्षिताःस्वखवाह्याः साधुशोभनेवहन्तिसा
धुकारिणिचेतिणिनिः साधुवाहिनः द्वे २
॥ वनायुजाः पारसीकाः कांबोजाबाह्लि
काहयाः ॥ वनायुःवानायुःसंज्ञोदेशभे
दः ततोजाताःसप्तम्यांजनेर्डः वनायुजः १
अन्यत्रापिवावनायुजाः निरर्थविहायवन
जाद्वनायुजस्तत्इतिमुकुटः आजानेयः कुल
जोवनायुजः पारसिकाःकः इतिरत्नकोशपि
कृत्स्नादिः पारसीकदेशभवाः कोपधाच्चेत्याण्



ग॰
म॰
२८६
28b

ण्यपारसीकाः पारसीकनामदेशोद्भवाः इत्यपरे
काम्बोजेजनपदेभवाःकाम्बोज्याःकाम्बोजाः।
ल्लमितिवानंतज्जनपदशब्दात् क्षत्रियादञि-
त्यञ् एवंल्लमितिकाम्बोजः टीचौडेवेव एवं-
बाह्लिकेजनपदेभवाःकोपधाच्चेत्यादिना
ण्बाह्लिकाः बाह्लीकं बाह्लिकं धीरहितु-
लोनोच्चदेशयोरितित्रिकाण्डशेषात्टीदेमध्य
श्चबाह्लीकः एतेहयाह्वयविशेषाः प्रत्येकं
भिन्नाइत्येके द्वयोर्द्वयोःपर्यायइत्यपरे शे-
ताल्लोकेकन्काल्लेवनायुजमपिपारसीकमिति
नाममालायां वनायुजपारसीकयोरभेदो
पचारात् पर्यायतापारसीकोद्दंत्यमध्यः प-
धामभेदोपचारादेकत्वंव्यक्तिभेदाद्बहुत्वं ॥
ययकस्योश्वमेधीयो ॥ अश्वमेधायहितःउप
यज्ञोःश्वमेधस्यलक्षणात्तेऽनिकज्ञोयाति-
व्यवेतियोच्छेवेतिकम्प्रत्ययोद्विवचनंवयय-
ह्येत्तस्यः अश्वमेधाच्छ्चअश्वमेधीयः ॥ द्वे
अश्वमेधीयाश्वस्य २ ॥ जवनस्तुजवाधिकः
॥ जवेनवेगेनाधिकाःश्रेष्ठोःश्वोजवनोस्मा-
दिःजुइतिसौत्रोधातुःवेगवरूत्यर्थःजवंङ्क्रा-
म्येतिकचुप्रजोविनिःप्रजवीचात्रएकं १ ॥
पृष्ठ्यःस्थौरी ॥ पृष्ठस्थूलमपिवाहुनुपचा-
रात्पृष्ठेनतयोमायप् प्रकरणोन्येभ्योपिदृश्य-
तेयप्पृष्ठ्यःस्थूलतेसंवियतेपृष्ठमनेनेति
गुरोश्चहलइतिअकारेलरयोरेकत्वस्मृतेःस्थ-
गपर्यायेणतस्येदमित्यणिस्थौरंपृष्ठ्वोपितभा-
रादिकंतयोमायुन्स्थौरीस्थामीस्थौरीपृष्ठ्यः
पृष्ठवहइतिवोपालितः द्वेपृष्ठभवत्पृष्ठे

नभारवाहिनोश्वस्य २ ॥ सितःकर्कः ॥ सि-
तःशुक्लवर्णोश्वःकर्कउच्यतेकरोतिशोभांकृ-
ञ्धारानित्रिकलिभ्यःकइतिकः एकं १ ॥ र-
थ्योवोढारथस्ययः ॥ रथस्यवोढारथ्यःतद्व-
हतिरथयकमप्रसंगादितियत् ॥ बालःकिशो-
रः ॥ किशोत्तेकिंएवोट्टणातेवीकारिवकि-
भ्मोमोरइत्योरोनैककत्कवर्णलोपेकिशोरःकाश-
तेशोभतेकिंशोरोवादयइत्योरन्प्रत्ययेउपधा-
याइत्वेचनिपात्यतेइत्यन्ये ॥ वाम्यश्वावडवा
॥ वाम्यतेगर्भःइवमनुत्किरणोणन्तात्वजि-
गोरादिङीषिवामीवमन्तुइक्तिइतिगर्भेत्वलती-
त्यादिनाःएप्रत्ययेगौरादिङीषिवा अश्वादिषा-
ह्मात्वाप् अश्वाश्वीत्वेपिबलेसामर्थ्येमातिशायि-
तमश्वात्तीतिवप्रकरणेन्येभ्योपिदृश्यतेइति-
वः डलयोरेकत्वस्मृतेःवडवा बलेमैन्यवाति
गच्छतिवाश्वातइतिकेपृवेवबडवा बलेनसा-
मर्थ्येनवातिपृषोदरादिवा त्रीणिश्वायाः ३ ॥
वाडवंगणे ॥ वडवानांसमूहेगणेखेडिकादि-
भ्यश्चेत्यण्वाडवं १ ॥ त्रिषुसर्वेयदश्चेनहि-
नेनैकेनगम्यते ॥ यदध्वएकेनाश्वेनैकदिने
गम्यतेतिक्रम्यते तत्रअश्वैकाहगमइतिख-
ञ् आश्वीनंत्रिषुलिंगेआश्वीनोध्वाआश्वीनंवर्त्मे
आश्वीनापद्धवी १ ॥ कश्यंतमश्वमध्यानो ॥
नीअन्नुहेत्वंडधंडकमपुतपरस्केहामित्यत्रक-
शिःसौत्रोधातुःतालव्यान्तःकशतिगमयति-
अश्वंपचाद्यचुटापूकशाचमेमध्यस्ताडनीक
केशानिदेशीग्राभ्रशोपेशिकशात्तालव्यान्ताः
लहलायातताडनावाकशात्तामर्हेतिदंडादिभ्यो-

रा॰ मं॰

359

287

यः कश्यमस्थानो मध्यमध्यभागः २ ॥ ह्रेषा ह्रे
षा च निःस्वनः ॥ अश्वानां निःस्वनः शब्दः ह्रेष
अव्यक्ते शब्दे ह्रेषृ गतौ गुरोश्च हलश्चेत्यकप्रत्यये
ह्रेषा हेषा चोच्यते हेषा कं हाहहिंगोमनं द्वे २ ॥
निगालस्तु गलोद्देशः ॥ अश्वानां गलोद्देशो गा
लसमीपभागो निगिरत्यनेन गलं निगरणेन लो
ति ति च नृ निगलत्यनेन वा गलग्रहने हलश्चे
ति घञ् निगालः अंटावंधसमीपस्थो निगाल
कीर्तितो बुधैः तस्मिन्देवमनिर्नामरोमजः शुभ
कृन्मतइत्युच्यते त्वेषानामिति च्योणन्तमनुष्य
ज्यते ॥ वृन्दे त्वश्वीयमाश्ववत् ॥ अश्वानां वृन्दे
ऽश्वीयं केशाश्वाभ्यां वेच्छा वन्यतरस्यामिति छः
अश्वीयं पक्षे ऽनुदात्तादेरञ् आश्वं द्वे २ ॥ आस्कं
दितं धौरितकं रेचितं वल्गितं स्नुतं गतयोऽमूः पं
च धाराः ॥ आस्कंदितादयो ऽश्वानां पंचगतयो
धाराशब्दवाच्यास्तत्र धीः धार्यंते ऽश्वा अत्रेति हजो
ण्यंताङ्घिटाद्यङि टापि धारा तत्र उच्छ्रयाचसम
गतिरास्कंदितं स्कंदिर् गतिशोषणयोः भावे क्तः
अतोपि कांचनवल्गनागतिः धौरितकं धौर्यगतिर्वा
तद्येक्तः स्वार्थे कन् अव्यक्तश्रुवद्धने धौरितकमि
ति सर्वत्र अथ धौरितकं धैर्यं धारणं धौरितं च
तुरितिवाचस्पतिः मंडलिकया गमनं रेचितं
रेचिरिति ख्यातं रिचिर् विरेचने क्तः वेगेन विरि
ष्टे वि वल्गनं वल्गनं वल्गितं अ इति ख्यातं व
रयांऽप्रेन गतिः स्नु गतौ क्तः तिर्यग्गतिः स्नु
तमिति कलिंगः ॥ घोणा तु प्रोथमस्त्रियां ॥ अ
श्वानां घोणा ते घ्रासेन वल्लतिश्च घुटाप् घोणा
नासाग्रं प्रथममध्यभाग घोणा इति संभूत्यादयः

प्रुङ् गतौ वाङ्कलकात् उषिकृषीत्यादिना यन् प्रो
थाः प्रोथ पर्यायो ऽपचाय च प्रोथ इत्यन्ये प्रोथो ह
तो नासामूलप्रदेश इति स्वामी ॥ कविका ॥
केति कवते रट चलनाच्छाद्यते ऽङ् शब्दे चरः
स्वार्थे क इति कन् हिकावादि ति ङीषि कविका
कवी द्वे ॥ तु खलीनो ऽस्त्री ॥ खलीनः एषोह
ताद्दित्वाङ्गस्वः खलिनीत्यपि कर्णाणी चात्र द्वे क
टिश्याली इति ख्याताः २ ॥ शफं क्लीवे खुरः
पुमान् ॥ शमयति पादस्याततथ्यापचाय च
नैरुक्ते मकारस्य फकारः शफं स्फुर स्फुरणे स्फु
रत्यके शं ... स्वपश्चान्मावरत पुरत्नान्त्रा
खुरत्व प्रत्याली ढस्य गुहित्त विभागावनपुंक
इति कवर्गादितोदिः द्वे खुरस्य २ ॥ पुच्छोऽस्त्री
लोमलांगूले वालहस्तश्च वालधिः ॥ पुच्छश
मादेः चुर उपधान्यो वा लूयते धूमवमेः लूम
मङ्गं तेलं च ग्वति चलति खेलितपिंजादिभ्यश्चेोल
ति अन्येषामपीति टीचे लांगूलं जीणि पुच्छ
मात्रस्य ३ ॥ वालेति ॥ वालयोगाद्वालः स्प
वहस्तकार्ये देशादिवारणाद्धस्त इव हस्तः वा
लरूपो हस्तो वालहस्तः पाशः पक्षश्च हस्तश्च
कलापार्थाः कचात् इत्युक्तो वालहस्तो वालसमूहो वा
वाला धीयंते ऽत्रेति कर्मण्यधिकरणे चेति किः वा
लधिः द्वे केशलांगूलमात्रस्य २ ॥ त्रिषूपा
वृत्तलुठितौ परावृत्ते मुहुर्भुवि ॥ उपावृत्त
वो ऽहृत्ते लौठनार्थो ऽद्भुते द्वे कर्तरि क्तः लुठ उपा
वाते द्वे श्रमशांत्यर्थे पुनः पुनर्भूमौ लुठितस्य
श्वस्य २ ॥ याने चक्रिणि युद्धार्थे शतांगः स्यंद
नो रथः ॥ युद्धार्थे युद्धप्रयोजने चक्रवति याने

रा॰
म॰
२८८
289

शतमनेकोपलवत्वंशतमंगान्यवयवायस्य
शतांगः स्पंदतिस्रवतिचलतिचलनशब्दार्थो
दकर्मकाच्चस्पंदनः रमंतेसमरक्रीडांकुर्वंत्य
नेनरथः हनिकृषिनीरमिकाशिभ्यःक्थन्नितिक्थन्
प्रत्ययोऽनुनासिकलोपश्चः त्रीणिचक्रयुक्तस्यरथ
ङ्गानिमात्रस्यरथस्य ३ ॥ असौपुष्परथश्चक्रया
नंनसमरायसत् ॥ यद्यानेकक्रीडार्थेनभवतिकिं
तयात्रात्सेवादौपुष्पवेभ्रमणायवयन्नंगल्पया
मसौपुष्परथः महारथः पुष्परथेरथोमीतिना
तत्रार्थेनश्लेषः सववरवधूविहारायेतिरत्नको
शादिःपुष्परथोऽन्तस्यमध्यः पकं २ ॥ कर्णी
रथःप्रवहणंडयनंचसमंत्रयं ॥ कर्मणिमा
त्याक्रियाश्रुतिरुपचारेणकर्णः तयोमत्वकर्णी
मत्वर्थेइनिः कर्णीचासौरथःकर्णीरथः विशे
षणसमासेऽन्येषामपीतिदीर्घः रथस्यश्रुति
मात्रेहितत्रकृत्वपरमार्थेतोरथत्वंयद्धास्कंदः
स्यकर्णीसमीपत्वात्कर्णीस्कंदः शेषंपूर्ववत्
कर्णीरथः वहेः प्रपूर्वात्वहगतौवित्यतःका
रणेल्युटिकृत्यचइतिणत्वेप्रवहणंवहनेचक्रे
त्रिवडीङोल्युटिडयनमितिपठंति त्रीणिस्त्री
वरवाहनार्थमुपरिवस्त्राच्छादितस्ययानविशे
षस्य ३ ॥ क्लीबेनः शकटोस्त्रीस्यात् ॥ नी
त्रिकोपायत्वाटनित्यनेनअनप्राणनेअस्मादि
तिअरन् अनः शक्नोतिजीवयितुंशकं धाति
भोटन्शकटः उक्तंच शकटः शाकिनीगा
वोयानमस्कंदनेध्वने अनूपःसर्वतोराजा
इभिदेनवहनंयदइति द्वेशकटस्य २ ॥ गंत्री
कम्बलिकाद्यकं ॥ कम्बलोनागराजेस्यात्सा

स्नाप्रावारयोरपिइतिमेदिनिः कम्बलः सास्ना
तयोगात्कम्बलिनोवृषास्तैर्वाह्यंवाहनीयंगम्य
तेऽनयागमेष्ट्रन्षित्वात्ङीषिगंत्रीगाडीति द्वेवृ
षवाहनीयस्य २ ॥ शिविकायाप्ययानेस्यात्
॥ शिवंकरोतितत्करोतीतिणिचात्ण्वुलिप्र
त्ययस्यादित्वंशिविकाशिवाश्रेयस्करीसंज्ञा
यांकन्वाशिविका रेफोयाप्यावमाधमाइतिव
ह्यतेयाप्येरुमैर्नीयतेयोज्यतेइतिल्युट्याप्य
यानं द्वेझंपानइतिख्यातस्य २ ॥ दोलाप्रेंखा
दिकाःस्त्रियां ॥ दोलइत्युत्क्षिपतिडुलतत्क्षे
पेचुरादिस्ततोऽचुजामनोइतिकश्मीरदेशे
दोलाप्रेंखः प्रमानप्रेंखोलिः श्रीणिरथिरोहि
णीतिरत्नकोषः आदिनाविहायाद्यादिदोला
द्वयंचविविधायानदोलाप्रेंखादोलाचेतिउद्या
नादिक्रीडार्थेरज्जुमयीस्यानांतरसंचरणाय
दारुहंडिकापटादिमयीयारज्जामनुष्यवाह्या
चयातत्रदोलावर्ततेप्रेंखादिकादोलोच्यतेइ
तियोजना ॥ उभौतुद्वैपवैयाघ्रौद्वैपिचर्मावृते
रथे ॥ द्वीपिनोव्याघ्रस्यविकारश्चर्मद्वैपंप्रा
णिरजतादिभ्योऽञ् एवंवैयाघ्रः ततस्ताभ्यांप
रिवृतोरथइत्यर्थे द्वैपवैयाघ्रावणन्द्वैपोरथः
वैयाघ्रोरथः इतियथाक्रमेणैकैकं ॥ पांडुकं
बलसंवीतोस्यंदनःपांडुकम्बली ॥ रथेकां
बलवास्त्राद्याः कंबलादिभिरावृते योगपोरथो
वैनयिकस्त्वाध्वन्यः पारियानिकः अस्योच्चूला
वहलाख्योहृद्वोपेत्युक्तोविकर्णिका त्रिषुद्वैपादय
योरथ्यारथकट्यारथव्रजे धूःस्त्रीक्लीबयानमु
खे ॥ पांडुनाप्ञ्जेनकंबलेनावृतःसंवीतःपरि

रा॰
म॰
२८८
289

हृतोरथः पांडुकंबलादिभिः पांडुकंबली रेति
कंबलेनावृतः परिवृतोरथः कांबलः एवंवास्त्रः प
रिवृतोरथ इत्यणग्रादिनाचार्मणौमहौकूलादिप्र
हः त्रिषिति द्वैपादयोवास्त्रांतास्त्रिषुलिंगाइत्यर्थः
रथोति रथानांव्रजेसमूहेरथ्या खलगोरथाद्य
त इतित्रकट्याश्चेतिरथकट्याहे २ ॥ धूरिति ॥
धूर्वहतिहिनस्तिबाहुलकात् तत्रतेषांवंधनी
त धूर्वीहिंसायांः अजभामेत्यादिनाक्विप् धातो
रित्यादिनादीर्घः राल्लोपः धूःआशरिमनेत्वापि यु
गवयानमुखेपुरोभागः द्वे २ ॥ रथ्यायत्रस्य
॥ स्यादुपांगमपस्करः चक्रंरथांगे ॥ सामा
न्येनरथस्यांगमत्यक्त्वाचक्रादिकमपस्करः
अपकीर्यतेयथाहेस्वस्थानेस्थितेनेत्यादिना
पू अपस्करोरथांगमितिसाधुत्वेचेतिरथांगसे
नैवगतस्यार्थस्यापिचक्रमितिविशेषतोनाम
तरप्रतिपादनाय ॥ तस्यांतेनेमिः स्त्रीस्यात्प्र
धिःपुमान् तस्यांतोभूस्पर्शिभागः ॥ नयति
रथंनियोमिः नेमिः सर्वतोक्लिन्नेथ्योदितिङीप
नेमीच प्रधीयतेः नेनत्युपसर्गेघोः किः प्रधिः
द्वे २ ॥ पिंडिकानाभिः ॥ पिंड्यतेकाष्ठान्य
त्रपिंडिसंघातेयज्ञगौरादित्वात्ङीष्पिंडीस
चरथचक्रमध्येमंडलाकारायस्यांसर्वाण्यरा
ण्यासज्यंतेस्वार्थेकनिकस्त्वस्त्रपिंडिकानह्यंते
परावयवा अत्रनह्यमहतीत्यहत्वमः उपधा
वृद्धिः नाभिः साह्वयेणांतस्त्रीङीषिनाभीच द्वे २
अक्षाग्रकीलकेतुद्वयोराणिः ॥ अक्षस्यशक
टस्याग्रेपुरोवर्तिनिकीलकेअणिरिशाह्यायते
ऽणी शह्याधौयणिरित्यणिरादिकस्त्रस्त्रिया

मणीचरीधौरिसुअणिआणिवद्दअक्षाग्रकीलकाश्रि
मीमासोद्वयोरितिमेदिनिः २ ॥ रथगुप्तिर्वरू
थोना ॥ कांड्रादिभ्योरथायाथैर्रथस्यगुप्तिर्वारण
वरूथः वृणोतिरथंजःउवृत्रोरुथन्प्रत्ययः
णाभिघातानांतद्वारणार्थेरथस्यमत्राहवच्यदावरः
णकादिकुर्वन्तस्यदे २ ॥ कूवरस्तुयुगंधरः
॥ रथस्याग्रभागयत्रबध्यंतेतद्युगकाष्ठंतदाधार
त्वयः संज्ञकवर्तेशाह्यायते कूर्दश्चाहे कुमर्यर्हज
वत्रिभ्योवरचितण्यतिवहुवचनात्तुवरचुङ्गरा
दित्वात्ङिप्वेगणाभावः महस्वात्तदंभूमिहृणो
त्याच्छादयतिपचाद्यच् अन्येषामपीतिदीर्घः
कूवरइत्यन्ये युगंधारयतिसंज्ञायांभृतृवृजी
त्यादिनाखच्मुमयुगंधरः ॥ अनुकर्षोदार्वधः
स्थं ॥ रथस्याधस्तलभागेयद्दाऋधारणका
ष्ठंतिष्ठतियतोपस्त्रक्रमपरिपद्दकर्मयत्रचक्रे
तदनुकर्षःशाद्वाच्येअनुगतेनसंबंधेनचक्रे
णकृष्यतइतिवृत्र् नकारांतोप्ययंअनुकर्षा
ऽत्तत्ललक्षावितिबोपालितात् ॥ प्रासंगोना
युगाद्युगः ॥ अनसः शाकटस्यसंबंधियुगमनि
संबंधवायत्रणतद्वोऽन्यत्तयुद्धत्स्सानोदमनका
लेस्कंधअआसज्यतेयुगंप्रासंगः आह्ः प्रवोत्प्रे
जैःकर्मणिघञ्चजोः कुरितिकुत्वंप्रासंगः ॥
सर्वस्याहाद्दनेयस्यायानेपत्नेचधोरणं ॥ स
र्वेहस्त्यश्वादिवाहनेयानादिचतुष्कवाच्यमित्य
न्वयः वहंतिदेशांतरंप्रापयंतिइत्यमनेनेतिवा
हेकरणेल्युडितिवाहनमाहितादिभिर्निर्देशात्
दीर्घत्वंवाहयंतिवाहेण्यंतात्ल्युडितिवाहने
यांत्यनेनयानेतः करणेल्युट् यानेयज्यतेडपप्र

ग
म
२५
290

ज्यते इहं गमनमिति कज्यं च पत्नं इति कापिनिपा
तः पतत्यनेनेत्यश्रीत्यादिना ष्ट्रन् पत्रं घोरयति
चात् वैयं करोति घोर्यं गति चात् वैयनेत्यादि वाहः
घोरणं पंचवहस्त्यश्वरथदोलादेः ५ ॥ परस्प
रावाहनं यत्तद्वैनीतकमस्त्रियां ॥ आरूढस्य
हूयत्परत्नां तद्व इति परस्परयैव वहतीति वैनीत
कं यथा दोलां वहन् दोलावाहकः रथं वहन् रथ
इति संज्ञायां कन् विनीतकं प्रज्ञाद्यणि वैनी
तं ॥ आधोरणा हस्तिपका हस्त्यारोहा निषादि
नः ॥ आधोरयति वल्गांगतिं प्रापयति एवं वा
ल्लुः आधोरणाः हस्तिनं पातं आत इति कः ह
स्तिपाः ततः स्वार्थे कन् हस्तिपकाः हस्तिनमा
रोहंतीति कर्मण्यण् हस्त्यारोहाः निषादयति हस्ति
नं प्रवेशयति आज्ञादित्वात् णिनिः रावणके वा
वादिहस्त्यारोहस्य ५ ॥ नियंता प्राजिता यंता
नः ॥ नियमयत्यश्वान् नियमेस्तृच् नियंता
ता च प्राजयति गमयत्यश्वान् प्राजेस्तृच् प्राजि
ता वलादावार्धधातुके विकल्प इति वेः प्रजेः
अजपोरिति न वीभावः रवति प्रेरयत्यश्वान्
न् प्रेरणे गत्यर्थत्वाद्धौ च कारस्य समुच्चयार्थत्वा
त्कर्तरि क्तः सूतः क्वसेः सौत्रान्नस्यानेष्टत्वा
दिनात् क्तच् अनिट्त्वेच ॥ क्षत्ता च सारथिः सव्ये
ष्ठदक्षिणस्थौ च संज्ञा रथकुटुंबिनः ॥ तह
स्यर्थे हिंसायां वेत्यतत् ल्लन् तृच् वा सरथस्यापि
न्ये सारथिः स्वामी रथगतो हेरम्स लिन् सारयति ग
मयत्यश्वान् सारेरतिथिः सव्येवामपार्श्वे तिष्ठ
ति हिवेः अत्नित्यपि काव्यनयते डिष्टेत्यत्रैवेत्या
सव्येस्थ छंदसि इति अत्तङित्वादिलोपः सव्या

मादिषु चेति षत्वं तत्पुरुषे कृतीत्यलुक् सव्येष्ठा
अदंतः सव्येष्ठादंतोपि प्रातिपदिकाद्दक्षिणस्थश्च
सादी सारथिरुच्यते सूतः क्षत्ता नियंता यंता स
व्येष्ठ एव वेत्यमरमाला दक्षिणेति ष्ठति सपीति
कः दक्षिणस्थः केचित्तु सव्येष्ठा दक्षिणस्थे रथवाह
कस्याश्वस्येत्याहुः तदयुक्तं ग्रंथितामरमाला
यां सारथेरेव तयोक्तः एते त्रयो रथकुटुंबिनः
सारथेरेव रथस्वामिनः क्तुः रथिको रथिनो रथीति
वत्यतेपव ॥ रथिनः स्पंदनारोहाः ॥ रथयो
गाद्रथिनः रथिनः स्पंदनमारोहंतीति स्पंदनारोहाः
ठेरथमारूढ्ययोद्धुः २ ॥ अश्वारोहास्तु सादिनः
॥ एवं वदणं अश्वानारोहंतीति अश्वारोहाः साद
यंति अश्व मयंति आज्ञादित्वाणिनि सादिनः ॥ हेश्वा
रोहस्य २ ॥ भटा योधाश्च योद्धारः ॥ भटेतिप
रंते भटस्तौ वट भट परिभाषणेवा पचाद्यच् भ
ट्ते विपन्न रणाय धनादि नाभिद्यते एकं तद्द
तिवा भहाकयंत इति योधाः तृचयोद्धारः त्री
णि योधस्य ३ ॥ सेनारक्षास्तु सैनिकाः ॥ से
नां रक्षंतीति अण् सेनारक्षाः रक्षतीत्यादि प्राग्वह
तीय ठक् सैनिकाः द्वे सेनारक्षक प्राहरिकादेः २
॥ सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ॥
समवेता एकदेशीभूता ये हस्त्यश्वादयः ते सम
वेतार्थे परिषदो ण्य इत्यनुवृत्तौ सेनाया वेति ण्यः
सैन्याः ठकि सैनिकाः द्वे २ ॥ बलिनो ये सहस्रे
ण साहस्रास्ते सहस्रिणः ॥ सहस्रेण सहस्र
संख्येन गजादिना ये बलिनः सैन्यवंतः ते सहस्र
हं बलानि संत्येषामिति मत्वर्थे तपः सहस्रा
ण्णो विणीनीत्याणे वेत्यण् साहस्राः सहस्रिणः


हे २ ॥ परिधिस्थः परिचरः ॥ परितोसेनांते
तिष्ठतीति परिधिस्थइतिकः परिधिस्थः परितश्च
रत्यनुपरिचरः द्वे युद्धकालेपरप्रहारादरक्ष
कस्येत्यन्ये प्रयाणेसामंतस्यापणकारिणइत्य
न्ये सेनायांराज्ञोदंडनायकस्येत्यपरे इतिस्व
त्याटयोबहुलीकाकाराः ॥ सेनानीर्वाहिनीप
तिः ॥ सेनांनयति प्रापयति णीञः सत्सूद्विष
ति क्विप् सेनानीः वाहिन्याः सेनायाः पतिः हे २
॥ कंचुकोवारबाणो ॥ कच्यतेबध्यतेअने
कविदीर्णोबंधनेच साधने प्रागेवोक्तंवाणंवार
यतीतिकर्मण्यण् महद्वंसकादित्वात्परनि
पातः वारबाणः द्वे चोटकादेश्चोलकादिसन्नाह
स्य २ ॥ यत्तुमध्येसकंचुकाः बध्नंतितत्सार
सनमधिकांगं ॥ सकंचुकाः सन्नाहाः मध्ये
दार्ढ्याययद्बध्नंतितत्सारंबलमस्यतेआदीयते
दीप्यतेवाऽनेनअसगतिदीप्त्यादानेषुकरणेल्यु
ट् पृषोदरादित्वात्पररूपत्वेसारसनंकथियद्बध्य
ते उरश्छदंउत्सारयतेनमित्यन्येसारशनंमेखला
यामप्येवंचतत्त्रिणामितिविश्वः अधिकमं
धातूच्छमंगमनेनाधिकांगं अंगाद्यधिकमिति
वाऽधिकमंगंतीतिस्वामी अधिकांगंसारसन
मित्यमरमालायामाधोपाह्वेऽधिकांगंस्याद्भि
द्धेकंचुकदार्ढ्यायमध्यकायेनिबद्धसपहिका
हेः २ ॥ अथशीर्षकं शीर्षण्यंकेशिरस्त्रे ॥
शीर्षप्रतिकृतित्वात्कन्शीर्षकं शीर्षकंस्य
द्वसमस्याद्वाशीर्षमारोहतिप्रातिपदिकाद्धात्व
र्थेइतिणिजंतात्ण्वुल्शीर्षेपरिवर्तितत्वाच्छी
र्षमिवशिरः इवेतिवाशिरसेहितंशरीरावयवा

द्यत्शीर्षस्त्वड्डितइतिशिरसः शीर्षत्राणे द्वे शाः ये
चाभावकर्मणोरितिप्रकृतिवत्त्वंशीर्षण्यंशिर
स्त्रायतेत्रातइतिकः शिरस्त्रे त्रीणिटोपइति
ख्यातस्य ३ ॥ अथ तनुत्रंवर्मदंशनंउरश्छदः
कंकटकोजगरः कवचोस्त्रियां ॥ तनुत्रायते
इतिकः तनुत्रंवृणोतिदेहंवृञोमनिन्नितिमनि
न्वर्मदश्यतेआद्रियतेऽनेनदंशिदंशनस्पर्श
नयोरितिचुरादिःल्युट्दंशनं उरश्छाद्यतेऽनेन
पुंसिसंज्ञायामितिघः छादेर्घेइतिह्रस्वः उर
श्छदः कंकयतिपरप्रहरणंक्वथेत्तानयतिकः
क्विबकीतिकंकेगत्यर्थात्तणंताच्छकादिभ्यो
ऽटन्स्वार्थेकः कंकटकः कंवायंकटत्यावृ
णोतिपृषोदरादित्वान्मकारोवाजागर्तिशस्त्रा
दिवारणेजागर्तेरच् पृषोदरादित्वाद्ध्रस्वत्व
मितिस्वामीजगरश्चवर्गादिः जगरः कंकटो
योगः सन्नाहस्याउरश्छदः इतिवोपालितः
कंवातंवंचयतिशरीरसंबंधंगमयतिवंचुरा
तौ मूलविभुजादित्वात्कः कवचः सप्तसन्नाह
स्य ७ ॥ आमुक्तः प्रतिमुक्तश्च ॥ आमुच्य
तेआङ्प्रतिपूर्वान्मुचेः कर्मणिक्तः आमुक्तः
प्रतिमुक्तश्च ॥ पिनद्धश्चापिनद्धवत् ॥ अ
पिनह्यतेनह्येर्धः वष्टीत्यादिनाऽप्येरकारलो
पः पिनद्धः पक्षेपिनद्धः चत्वारिपरिहितस्य
वस्त्रादेः ४ ॥ सन्नद्धोवर्मितः सज्जोदंशितो
व्यूढकंकटः त्रिष्वामुक्तादयः ॥ सन्नद्धः कृ
तसन्नाहः एवंवर्मणासंनह्यतेइतिसन्त्यापे
त्वादिनाणिचिरूपवद्धावादिलोपेचवर्मितः
तारकादित्वादितच्चूर्णानिर्भेद्यः सज्जोरभिमुख

ग
म
३५२
202

सजतिगच्छति घस्लगतौ अव्ययस्सजः सुरालोटीभि
शस्पर्शनयोः क्तः हेषितमिति मैत्रेयः हेषाने हेषाः
भावे च क्त ततस्तत्करोतीति णिजंतात् क्तेपिलोपे
हेषितमिति वा पूर्ढः केकले येनेति बहुव्रीहिः
पंचकृतसन्नाहस्य ५ ॥ त्रीणि अश्वसक्रांदस्य
केकटोताः त्रिषु त्रिलिंगा इत्यर्थः ॥ वर्मभृतां
कावचिकं गणे ॥ वर्मभृतां धृतसन्नाहानां
लोकवचिनां समूहे हज्जकावचिकं द्वे २ ॥ प
दातिपत्तिपदगपादातिकपदाजयः पद्गश्च
पदिगश्च ॥ पद्भ्यामततिअजतिवअतसातं
त्यागमनेः तिगत्यर्थः इज्यजादिभ्य इतीजप
हृतीत्यादिना पदादेशः अजादेरनिपाभ्यांगच्छ
ति अन्येभ्योपीति डः पूर्ववत्पदादेशः तत्ता
न्नवीभावः पदातिपदाति स्वपयतेगच्छतिक्रिव
बाहुलकात् तवषिभ्यो क्रिन्वापतिः पदाभ्यां ग
च्छति अन्येभ्योपीति डः पूर्ववत्पदादेशः पदा
ते रविनयादिभ्य ठक् पदातेः स्वार्थे कत्वापा
दातिकः पदाविकः इति पाठे अवरत्नो गमा
दोहंडीकापाशल्यविभ्य इति कन् ठक् चा गमः
पादाविकः अवनमावः पादेनावो रत्नपादा
वः ततस्तत्र निरूढ इति ठ नित्यन्येपादसमा
नार्थोपि पच्छ होशिपद्भ्यां गच्छति डः पद्गः पा
दाभ्यां चरति पादातिकः ठन् केचरतावितिपा
द्भावः पदिकः मूलविभुजादित्वात् के पादशाहो
पाद्य पदाति पत्ति पादात पादाविक पदाजय इ
त्यमरमाला सप्त पादातिकस्य ७ ॥ अथ पा
दातं पत्तिसंहतिः ॥ पत्तीनां पदातीनां संहतिः
समूहः भिक्षादिभ्योण् पादातं द्वे २ ॥ शस्त्राजी

वा कांडपृष्ठ आयुधीय आयुधिकाश्च ते ॥ शस्त्राजी
वंते प्राणान् धारयंते अनेन करणे च ञ शस्त्रमाजी
वोस्य शस्त्राजीवाः जीविकार्थमिति शेषः स्पष्ट
गृहीतं कांडं येन स्पर्शे एवं कत्वात गृह्णस्य पा
ठ नामनेकार्थत्वाद्धाः स्पृशि तेनो पाधेवतीते इ
त्याहिताग्न्यादित्वात् परनिपातः कांडमित्यायु
धमात्रोपलक्षणं कांडपृष्ठः कांडानि पृष्ठे अस्य
कांडपृष्ठ इति आयुधेन जीवति आयुधाच्छ चेति
छः चकारात् ठक् आयुधीयाः आयुधिकाः ॥
दिनामुद्गकलायादिग्रहः ॥ मुद्गोमाषोरा
जमाषः कुलत्थश्चणकस्तिलः कलायश्ची
वरश्चेतिशमीधान्यगणः स्मृतः इतिरत्न
कोषः ॥ शूकधान्येयवादयः ॥ शूकप्र

हितंधान्यंशूकधान्यंआदिनागोधूमादिग्रहः
॥ शालयःकलमाद्याश्चषष्टिकाद्याश्चपुंस्य
मी ॥ दृढत्वालेबहुतरजननोत्पन्नंधान्यंक
लमशब्दवाच्यंप्रथमाद्येनकिंचिदपकृष्टर
क्तशाल्यादिपरिग्रहः षष्टिकषाष्टिकाद्याइ
तिख्याताः द्वितीयाद्येनकलमादेः किंचिद
पकृष्टनीवारादीनामतएवषष्टिकादेः पृथ
निर्देशः अपकृष्टत्वंतुपाककालभेदेनाप
कृष्टपाकत्वात् आद्याइतिमाषाद्याः शाल्यं
तापुंसीत्यन्वयः ॥ तृणधान्यानिनीवाराः
॥ अपकृष्टत्वनत्वेनावश्यकत्वात् तृणा
नीवधान्यानितृणधान्यानिनिव्रियन्तेऽन्य
त्वात्नीवृधान्यइतिचन्द्र उपसर्गस्येति
नित्यंदीर्घत्वंनीवाराः बहुवचनांतेनश्यामा
कादिपरिग्रहः हेउद्धीधान्यादेः १ ॥ स्त्रीग
वेधुर्गवेधुका ॥ गवेगवार्थ्येदीयतेरक्ष्यते
सौदेहूरवदृणोसितहूदिवात् हुःनेकक्रोद
कारस्यडकारः नस्फकषेकृतीत्यलुक्गवे
धुः एवंगवेधीयतेधार्यतेस्यापयतेएवंबहु
व्रीहुअल्पकृगवेधुःततःकन्नदापूगवेधुका
हेबडगडइतिख्यातस्य १ ॥ अयोग्रंमुस
लोऽस्त्रीस्यात् ॥ अयोलोहमग्रेमुखेअस्याग्र
योग्रः मुष्णाति खंडयतिधान्यादिकंमुसल
इनेहूपादित्वात्कलच् मुसलोहंत्यमध्यः
मूर्धन्यमध्यश्चेतिप्रागात्मकं हेमुसलस्य १
॥ उदूखलमुलूखले ॥ ततऊर्ध्वंखमस्य
लातितद्धर्धेमुखमस्यवापृषोदरादित्वाउद
उलूहत्येनावादेः शौमुखपदेमुखपाठस्य

ग

ग्

खलादेशः उलूखले उदूखले हेकोडनो
तिख्यातस्य २ ॥ प्रस्फोटनं शूर्पमस्त्री ॥ प्र
स्फोट्यते ऽनेन करणे ल्युट् प्रस्फोटयति स्फो
टविशरणे नेयादि त्वाल्पूर्वो प्रस्फोटनं शूर्प
यति शूर्पमाने पचाद्यच् शूर्पं तालव्यादिः
शूर्पं किंशारु शूर्पो शुकमिति शुभेदात् को
चित् दंत्यादिकं मन्येव पिस्टूर्पमिच्छेति हेकु
लाइतिख्यातस्य २ ॥ चालनी तितउः पुमा
न् ॥ चाल्यते तंडुलादि शोधनाय ल्युट् कर
णे चाल्यते अनयावा करणे ल्युट् चालनी
चालनं च चालनं तितउ प्रोक्तमिति क्लीवको
डे रत्नकोषः अतएव तितउ क्लीवमपि नस्त्री
तितउ चालनीति त्रिकाण्डशेषः तनोतिवा
लङ्कं तनोतेः डुः सन्वच्चेति डु प्रत्ययः सन्व
त्वात् द्वित्वमित्वंच अङ्गुणाभावश्चेति तितउः
विधानसामर्थ्यात् अन्यथा लाघवार्थ्यं तितो
रितिब्रूयात् हेचालनीतिख्यातायाः २ ॥
स्यूतप्रसेवौ ॥ सीव्यतिषिवु तंतुसंताने क्तः
क्तोः शूडित्युट् स्यूतः ऊणादिकमप्रत्यये स्यो
नप्रसेवावितिचपाठः स्योनस्यूनप्रसेवका
वितिरभसः प्रसीव्यते प्रसेवः कर्मणि घञ् हे
थैकडीतिख्यातस्य २ ॥ कंडोलपिटौ ॥
कंड्यते ऽनेनकडिभेदे पटिकादिकडिभ्यओ
लच्चितिओलच् ॥ कंडोलः पेटतिसंहतो
भवति पिटशब्दसंघातयोः इगुपधात्कः पि
टः पिटकोपीतिस्वामी हेथपडीतिख्यातस्य
२ ॥ कटकिलिञ्जकौसमानौ ॥ कटत्या
वृणोति कटीवर्षावरणयोः अच् कटः किल

ति किलशब्दोत्य क्रीडनयोः इगुपधात्कः इत्यादिभ्य इत्तो
क् किलिः शेतेत्यं तत्तज्जयति किलिञ्जकः हेथा
न्यादि धारकस्य लक्षणार चित तरजोः वेहथाइति
ख्यातस्य २ ॥ रसवत्यां तु पाकस्थानमहान
से ॥ मधुरादिरसयुक्तानि पाकद्रव्याणि रसाः
तेऽस्यां संतीति मत्वर्थे रसवती पाकस्य स्थानं
पाकस्थानं महच्च तत् अनश्च अनो ऽश्मायोऽ
न्यादिना टच् समासांतः महानसं अनमाउपक
रणेलत्यते इति स्वामी आहयः चीणिबंधनशा
लायाः ३ ॥ पौरोगवस्तदध्यक्षः ॥ तदध्य
क्षो रसवत्यामधिकृतः अध्यक्षः पुरः प्रथमे
पाकवस्तु शौगोः नेत्र मस्य पुरोगः गोः स्त्रियो
रुपसर्जनस्येति ह्रस्वत्वं ततः प्रज्ञाद्यणिः पौ
रोगवः प्रथमं तद्दृष्टमेव वस्तु पाचकः पचती
ति पकं १ ॥ सूपकारास्तु बल्लवाः आरा
लिका आन्धसिकाः सूदा औदनिका गुणाः ॥
सूनोति रसं यत्र सूनोकिच्चेति सूनोतेः पः
उदूचोकारस्य सूपः कंजनं तत्करोतीति सूप
काराः येते पाकपात्रधारणाय लोहचयितं
वल्लेति प्रसिद्धं वल्लसंवरणे हलश्चेति घञ्
वल्लः तद्योगात् तेऽन्येभ्योपीति वः वल्लवः वल्लिः
सौत्रो धातुः प्रीत्यर्थः ततोपि जिवल्लः प्रीतिः
तां वाति प्राप्नोतीति आतदतिके वा आरालेऽक
टिलेवर्त्तते चरतीति ठक् आरालिकाः अन्ध
सः अन्नं तत् साधनं शिल्पमेषां शिल्पमिति ठ
क् आन्धसिकाः सूदंति हिंसंति स्वामाहीनू
सूरभस्तारिअच् सूदाः आन्धसिकवत् औदनि
काः गुणावेत्याः अभ्यस्यतिरंधनादिकं गुणाः ते

वा॰
म॰
३९६
३१६

चप्राशक्ताः सप्तसूपकारस्य ७ ॥ आपूपि
कः कान्दविको भक्ष्यकारः ॥ अपूपः पण्यम
स्य तदस्य पण्यमिति ठक् आपूपिकः कंडुः स्वे
दनीव्यते तत्र संस्कृतं पिष्टकादिकं कान्दव
संस्कृतं भक्ष्यं इत्यण् तत्पण्यमस्येति एवं वा
ठक् कान्दविकः भक्ष्यं मोदकादिकं करोतीति क
र्मण्यण् भक्ष्यकारः सूपकारस्य भक्ष्यकार
इति साहचर्यात् पण्यमित्यादि इति कलिंगादयः त्री
ण्येकैकेति व्याप्तस्य ३ ॥ इमे त्रिषु ॥ पौ
रोगवादयो वाच्यलिंगा इत्यर्थः ॥ अश्मंतम
उद्धानमधिश्रयणी चुल्लिरंतिका ॥ अश्मनो
ष्यंतोत्र अश्मंतं शाकं धातिः तालव्यमध्य अश्म
नो प्राणानामंतो ३ चेति अश्मंतं दंत्यमध्यमं दे
ति व्याख्यानं तत्र उपधीयते निवेश्यते पा
कार्थं स्थाल्यादिकमत्र तडाजो ल्युड् उद्धाने १
धा शाला अग्निसंयोगयोरित्यतः तत्र धायते ३
चो धानमिति तत्र रहितः अधिश्रियते पश्यते
३ स्थाल्यामिति श्रि न्नपके अधिकरणे ल्युड् ङीप् श्र
धिश्रयणी अधि एवौ ३ धेधातेः स्थाल्यादिपा
णो वर्तन इति कलिंगादयः नहि भिल्लकाः से
तौति स्थाल्यो नाधिश्रयंत इति कातंत्रपंचि
काप्रयोगः चुल्लि हावकरणे इति इः चुल्लिः
पदे ङीप् चुल्ली च अंतयति स्थाल्यादीनामंति
ठ्ठाकरोति अंति अदिर्बंधने संज्ञायामिति ण्व
ल् अंतिका पंचतनानइति व्याप्तस्य ५ ॥
अंगारधानिकांगारशकट्यपि हसंतिका इ
सन्त्यपि ॥ अंगाराणि धार्यंते अंगाराः ङः औ
णादिकस्तत्र धीयंते ३ कर्मल्युट् ङीप् ततः स्वा

र्थे कन् अंगारधानिका शकटः प्राग्युक्तः अल्पः
शकटः शाकटिका अंगाराणां शाकटिका अं
गारशाकटिका अंगारशकटी ज्वलदंगारैः
हसंतीति वा उल्लकाञ्जवोधि भावेन्ताडिगाल्लः
ल्लोङीष्वाव उल्लवचनात्तकर्तरि ल्युडिह
सनीच चत्वारि अंगारशकट्याः ४ ॥ अथ
नष्टीस्यादंगारः अलातमुल्मुकं ॥ अंगति
गच्छः अंगति चेष्टां करोति मंदारवत्त आरन्
अंगारः स च मात्रिः निर्वाप्रि स्थेति द्विविधः त
त्र माप्रोयथा अंगारचुम्बितमिवव्यथमान
मास्तेइति निर्वाप्रो यथा कलंकामलत्रत्योत्र
जतिमलिनांगारतुलनां इत्यादि प्रयोगाः
लाष्ट्राटनेकर्मो विवक्षायो भावे क्तः अविद्य
मानं लातं ग्रहणमस्य अलातं उल्लकान्त
इहिति रण्यो त्यादि नानत्वाभावः उषदाहे उ
ल्लकाद्यविके त्यादि उक प्रत्ययः मगागा
मोगुणाभावो लत्वं च पकारस्य निपात्यते उ
ल्लकां मुंचति उल्मुकं एषोदरादिरिति माध
वी ॥ त्रीणि अंगारकस्य ३ ॥ क्लीबेऽम्ब
रीषं भ्राष्ट्रोना ॥ अंबरीषमिति स्वामी अम्बः
शब्दे बाहुलकादीषन् अंबरिषादेशाष्टुप
वत्वञ्चेति अम्बरीषपचेरम्बादेशः ईषप्र
त्ययो रमागमश्च निपात्यते इति त्रिकाण्डशे
षः अम्बरीषपुरूषोद्भवमिति षमेदा
त्पूर्वंतालव्यमध्य भज्यतेकलायादिकमत्र भ्र
ष्ट्रिपाके भ्राष्ट्रामिनमिह्नि निविष्णवश्चा ह
हि स्त्रीति ष्टुत्वं ष्ट्रो भ्राष्ट्रः हेकलायादिभर्ज
नपात्रस्य २ ॥ क्लीबेऽम्बरीषं भ्राष्ट्रो ना ॥ स्वं

रा॰
म॰
399
317

इयतिशोषयतिस्कंदेः सलोपश्चेतिकः वाड
लकाडरितित्वस्वामी कंडवीनेत्यस्यन्वयात्।
कंडर्वीघमानित्यर्थः स्त्रियते स्यामित्यपि।
कर्वणोल्लृह खेटनीवास्त्रियामित्यन्वयाश्च
टनः अपिखेटनीमाहचयीत्कंडः स्त्रियामा
पीतिसुभूत्यादयः हेमश्चोन्यलाग्रेरूपेरि
निहितपिष्टकादिस्वेद्यस्याधोमुखेवस्क
पालकप्रायस्यलोहादिपात्रस्य २ ॥ अलि
जरः स्यान्मणिके ॥ अलनमोलिः अलेभू
षणपर्योनिवारणोपित्यतः कृष्यादित्वादिक्
अलिः सामर्थ्ये नत्वजरयतिइवोहृत्वात्पचा
दिपाठसामर्थ्यात् नत्वकपेकृत्तौत्यलकष्ट
लिंजरः मणत्यतिगंभीरत्वात् नत्वापेणोश
ह्यायतेश्राणराणेत्यादिनामः मणेः शाह्लादित्व
मणिः ततः स्वार्थेकाणमणिके हेजाडिइति
ख्यातस्य २ ॥ कर्कर्योलुर्गलंतिका ॥ कि
रतिसुरतिजलेकिरतेबाडलकालकारवृ गु
णः गौरादित्वात्ङीष्कर्करी कर्कसौत्रोधा
तुः अम्बरवटरनइतिसुभूत्यादयः अग
तोबाडलकात्तुन्नहडिः रेफस्यलत्वंअलू
अगतोबाडलकाद्दः रखलइतिडणललवं
च अलुरितित्तमस्र्वेस्वेअरडडयामेआङ्ःएवं
तदुरितिस्वामी गडतिगडुसेचनेबाडलका
ड्रेवाडिचुलडयोरैक्यात् लत्वंकृदिकारादि
तिङीषिगलंतीस्वार्थेकन्केगाइतिकरवः
गलंतिकागलतिस्रवंति नदतीतिशलस
पुस्वार्थेकन्गलेतिकेतिसर्वधरः चौणिवा
धोनीतिख्यातायाः ३ ॥ पिठिरंस्यात्स्थवा

कंडं ॥ पिठितिक्लिनत्तिपिठिहिंसायांअच्वे
रदत्रितिरत्पिठिरंस्त्रियांपिठिरीतिस्वामी।
स्थलतिजलादिकमत्रस्थलस्थानेस्थलति।
कर्मतेभ्योणः गौरादिः स्थालीघडास्योधातोः
स्याचमरजेबालचुवालङ्गीलीयः इत्यालवि।
स्थालीस्थालेच स्थालेभाजनभेदेचस्थाली
स्यात् पिठिरोक्त्वलयोरितिमेदिनिः उ।
खति उत्खति उखगत्याविति धातोः उखेरिगु।
पधेतिकः टाप् उखाकंडतेदत्यतेऽदं कंडि।
टाहे दाहस्यापाकार्थत्वात् पचतेः त्वचत्र।
कंडं कणतिशब्दायते कणशब्दोपकरणा।
योः कणादिभ्यः किदिति डः कंडमितिवाकं
डीच कंडीकमंडलौजात्यतिवतीलतेषु।
मानितिमेदिनिः चत्वारिस्थाल्याः ४ ॥ क
लशस्तुत्रिषुद्वयोः घटः कुटनिपावसी ॥
केनजलेनलस्यतेश्लिष्यतेलसश्लेषणे क्री
डनयोः स्वार्थेकः क्रीडतिवापचाद्यचकल
सोदंत्यसः तालव्यापिदंत्यास्य शब्दश्क
रणेशवः ॥ शंभुःशांकरपोशवः कलशः।
शब्दलेचैवतिक्काणोरशनातथा ॥ इति।
शभेदाज्ञालव्यश्चेतिसुभूत्यादयः स्त्रि।
योंकलसिः कलसीच घटतेचेष्टतेघटचे।
ष्टायांपचाद्यच्घटः स्त्रियांएवंवत्घटी कु।
टतिकुटेरित्पधान्कः कुटः नियतेपिबंत्य।
नेनेतिपः स्वार्थेकः अस्त्रीतिकाकारवि।
तकुटेनिपंच चत्वारिघटस्य ४ ॥ शरावो
वर्धमानकः ॥ शृणातीत्युशरः शरंशी
येमाणमवतिश्रृणोतिहिंसेतिशरावहिंसकाः

कीटादयः तेभ्यो ऽवतिवाशनावः मृल्लविश्रुता
दिव्यात्कः शंकरशाकरशरावशरश्रोणीश्र
लण्डकशारिकाशंबीतिशमेद्राजालब्बादेः स्वे
त्वादिश्च वर्धतेक्रमेणविस्तीर्णोभवतितालौ
ल्पेचानश्च स्वार्थेकन्वर्धमानकः द्वेशरावा
स्य २ ॥ ऋजीकंपिष्टपचनं ॥ ऋज्यतेरमो
त्र ऋजपत्तऋजनेऋजेरुष्क्षेतीषन् धातोःऋ
जादेशः ऋजीषंऋचीषमित्यपिपाठः इत्येके
पच्यतेत्रपचनेमिष्टस्यपचनं पिष्टपचनं ।
द्वेसामान्येनपिष्टपचनपात्रस्य २ ॥ कंसो
स्त्रीपानभाजनं ॥ पीयतेपानेस्त्रीरादिनस्य
भाजनंपात्रंसुवर्णरजतादिनिर्मितमपिकं
साख्यंच दर्शयतिकमिभ्यःसइति
सः कंसः वात्तवर्णादिष्वपिकांस्यंच द्वेतीव
दिपानपात्रस्य २ ॥ कुतूः कृत्तेः स्नेहपात्रं
॥ कृत्तेःचर्मणःस्नेहस्यतैलादेःपात्रंकुत
सितंतन्यतेवाहुलकान्तनिरष्योःकुरिति
कः कुगागमश्च कौतिशब्दायतेकुदूःशाद्वे
र्ववत्कः कुगागमश्च सवर्णादीर्घत्वेमि
धिःकुतूः दीर्घान्तासैवेत्यत्रैवाग्रिमपदेवक्ष्यमा
णत्वात् कुतूःस्त्रीलिंगा ॥ सैवाल्पाकुतुपः
पुमान् ॥ अल्पप्रमाणाकुतूःस्त्रीलिंगाकु
तुपःकुत्वाडुपच्छडित्वाहिलोपः कुतुपः ॥ स
र्वमावपनंभांडंपात्रामत्रेचभाजनं ॥ सर्व
माउप्यतेस्थाप्यतेद्रव्यमत्रेत्यादिश्रावपनं स
र्वंगोलीकंडोलस्थाल्यादिकं भांडंस्यादभांड
परिभाषणेपचाद्यचिष्टपोटदादिस्वाहीर्घः
भांडंपात्रस्त्राणाहन्यपात्रं अमनातिशब्दसेविभ

किप् अमितनिःसेयजिवधिपतिभ्योत्रन् अ
मत्रं भाजत्यष्ठकु कर्मणिल्युट् स्नुनदिःस्तुरिभाज
नं केचिद्भांडस्यपात्रादेश्चार्थेभेदमाहुः त
त्र ॥ स्याद्भांडमश्वाभरणेमत्रेम्यूल्येवणिग्ध
ने इतिवक्ष्यमाणत्वात् चत्वारि ५ ॥ दर्विः
कंबिः खजाका च ॥ दृणाति दृविदारणेदृ
दृभ्यांविन्निति विन्दर्विः कृदिकारादिति ङी
षि दर्वीचकम्यते कमुरुत्राम्नभ्यो विन्निति कं
मेः बाहुलकाद्विन्तकम्बिः खजंमन्थं विलो
डने खजतिमथ्नातिखजेः शाकः खजाका एषा
ङीपवसाहृदर्यावन्कम्बेःस्त्रीत्वे त्रीणिपाक
व्यंजनादिचट्टनोपयुक्तकाष्ठिकायाः ३ ॥
स्यात्तर्दूर्दारुहस्तकः ॥ तर्दतिगच्छतिद्रो
णुकेचेतिकुः डुगागमश्चतर्दूः उवर्णात्तीय
वान् हस्तप्रतिकृतिः हस्तकः इवार्थेकन् ।
दारुणः हस्तकः दारुहस्तकः दारुहस्तकः
साहृदर्यात्तर्दूः शाहूः पुंलिंगः द्वेअन्नादिप
रिवेशनार्थेहस्ताकृतिदारुमयस्यलोहमय
स्यवापात्रस्य २ ॥ अस्त्रीशाकंहरितकंशि
ग्रुः ॥ स्यतिशोनन्तकरोतनन्तकरोतिश
तत्यकारित्वात् दन्नुकापाशिल्पमतिभ्यः
कन्बाहुलकात् चानेरपिशाकंहरितव
र्णयोगात्स्वार्थेकन् हरितकंशिग्रुः प्राग
कः त्रीणिवास्तूकादिशाकस्य ३ ॥ अस्य
तुनालिका कडंबश्चकलंबश्च ॥ अस्यशि
ग्रोःनालिकाप्रकांडनलतीयेनलतिगंधक
रोतिस्वलनीत्यादिनाःनलःटाश्चस्वार्थेकन्
[illegible] नालिकाकडनिक्रकडिभ्यो ।

यां
सं
३९५
318
[illegible]

ग॰
मं॰
३१५
३१

गडिभ्यो ऽम्लचित्या ऽम्लचू कडम्बकलम्बौ केना
लम्बते कलम्ब इति स्वामी त्रीणि शाकनाडि
कायाः ॥ वेसवार उपस्करः ॥ विसप्रेरणे
वेसनं वेसः चक्र प्रेरणे विनियोजने वेशं प्रकर्ष
रूपं रसं व्यञ्जनस्य वारयत्याहणोति हरिद्राव
लोपचाद्यचूवे सेनवारः वेसवार इति समासः
हेत्वमप्यपवायें वेसवारः परिसरोमसूरः अ
मरसन इति समेघात उपकरोति व्यञ्जनेन म
मवैति समवाये चेति स्कृट उपस्करः हेमं स्का
नांघ्रंधीयमानस्य हि शुजीरकहरिद्राधान्यशु
ण्ठीमरीचपादेः २ ॥ तिन्तिडीकं च चुक्रं च वृक्षा
म्लं ॥ तिमे ष्टिमे वा ऽग्रतीकात्यय श्चेति निपात
नात ईकन्प्रत्ययः द्विवचनं प्रकृतिमकारस्य
डः तिन्तिडीकं चकात शैवकिवम्याक चकाचप
या इति रक् उपमायां वृक्षाम्लं चुक्रे हलस्याम्ल
महाम्लं चात्र त्रीणि तिन्तिलीतिख्यातस्य ३ ॥
अथ वेल्लजं मरिचं कोलकं कृष्णमूषणं धर्म
पत्तनं ॥ वेल्ल इत्यादिना वेडकात वेल्ले भोवे
ल्लवेल्लस्थलनं कडुत्वाजनयति वेल्लजं श
न्योभ्योपीति डः म्रियते ऽनेन कलीभवति जिह्वा
नेन मरिचं कुलति संस्त्यायति कुलसंस्त्याने
कृजादिभ्यो वुण कोलकं कृष्णवर्णेन कषति
वा कृष्णं ऊषति कडुका ह इति उषणं हि ज्ञेः कु
णउषणं कषजायामित्यतो ल्युटि कृषणं धर्मे
योग्यमपि हेवं धर्मपत्तने जातत्वात् ते नैव व्यपदे
शः षट् मरिचस्य ६ ॥ जीरको जरणो ज्याजी
कणा ॥ जडसोत्रो धातु जरति स्वेति रकई का
रस्यां ताद्देशः जीरः संज्ञायां कन् जीरकः जरय


ति अन्नादिकं ने ण्यादि त्वाल्युः जरणः अजेज्याना
म ति गंधोत्कटत्वात कडुत्वं यातिसर्वं भक्ष्याणा
पि व्याजे न न वा यते कर्मण्यण तात्कलीपञ्चज्या
जी अग्निसंयोगेन कणति शब्दायते ऽचुटापक
णकणात्वम ण त्वं तद्योगात्कणा वा चत्वारि जी
रकस्य ४ ॥ कृष्णे तु जीरके सुषवी कारवी पृ
थ्वी पृथुः कालोपकुञ्चिका ॥ सवनं सवः सुप्रे
रणे ऽस्त्यां हो र भ्रोभने सवः प्रेरणं विक्षेपो ऽस्याम
स्तु सवति प्रेरयति चाविक्षिपति दोषान् गौरा
दिङीषि उपसर्गादिति षत्वं सुषवीति स्वामी
सुषवी ऽहंत्यमूर्धन्यवतीताल व्यमध्येति सुभू
ति करोति यं कारवी कस्य वायोरारवो ऽस्यां गौरा
दिङीषि वा सा हि श्लेष्मकरा वायुप्रकोपकरी
प्रथते ख्यातिं याति प्रथ प्रथने प्रथ अदिभ्रस्त्रं
संप्रसारणं चेति ऋः संप्रसारणं यवोतोगुणावे
वनादि ति डीषु पृथ्वी पटे पृथुः कालाकृष्णा
उपकुञ्चति अल्पीकरोति दोषान् कुञ्चु गति
कौटिल्याल्पीभावयोः ण्वुल ततष्टाप् उपकुं
चिका षट् कृष्णजीरकस्य ६ ॥ आर्द्रकं शृङ्ग
वेरं स्यात् ॥ आर्द्रीन तत्रे जाते हर्वीक्षाप वाक्ले
त्याटिनावुन् आर्द्रयति सिंह्रणोळ्वल आर्द्रमेवा
र्द्रकं वा शृङ्गमिववीरं शरीरेऽस्य शृङ्गवेरं हे २
॥ अथ च्छत्रा वितुन्नकं कुस्तुम्बुरु च धान्यकं ॥
छत्राकारस्तवकयोगान्मत्वर्थीयाकारे तात
छत्रा पूच्छत्रात् इत्यथने भावे क्तः तुन्नं विगतं मेदा
पित्तात्ता जीर्णित्वादि कृतं तुन्नं व्यथनमस्मादिति
वितुन्नकं कुत्सितं तुम्बुरु कुत्सितं विस्तृतेनेकु
स्तुम्बुरु णिजातिरिति स्कृट कुस्तुम्बुरु धनधा

न्योपिनाकाटयश्चोत्याकः स्तगागमोटीवेवं
निपात्यते धान्याकं धान्यमकत्ति धान्याकमि
ति स्वामी धान्याकं धान्यकं धान्यं कुस्तुम्बुरु
धनीयकमिति रभसः धान्याको नाम्नि के वेति
रभसः चत्वारि धान्याकस्य ४ ॥ अथ शुण्ठी म
होषधं स्त्रीनपुंसकयो विश्वं नागरं विश्वभेष
जं ॥ शुण्ठति शुण्ठयति शुण्ठि शोषयति शोषय
ति कफमिति पचाद्यच् गौरादि ङीषि शुण्ठी वाड
लकात्किः शुण्ठिरिति भीमः सधन्यः शुण्ठिमेध
वमिति वैद्यकं महौषधं महागमं वडभ्रमाय
नादिषु विशति अश्यश्नोऽहत्यादिनाकन
विश्वं प्राणप्रकं विश्ववसवदत्यत्र नगरे भवं
नागरं विश्वस्य सर्वस्य भेषजं अनेकरोगजित
त्वात पंचशुण्ठ्याः ५ ॥ आरनालकसौवीर
कुल्माषाभिषुतानि च अवंतिसोमधान्याम्ल
कुञ्जलानि च कांजिके ॥ आरमेतात्ऋगयदि
पचाद्यच् आरः नलगंधे कर्मणि घञ् नालः
आरो हरति नालो गंधोऽस्य शेषादित्वादिना
कप् आरणालकं सुवीरदेशे प्रायेण भवं
सौवीरं प्राघ्नतेरत इत्यण् कुल्माषे प्राप्तेः अभि
नोतेः सवनार्थ स्यात्कर्मणि क्तः उपसर्गादिति
षत्वं अभिषुतं अवंतिप्रदेशे स्थाप्यते सोमं अवं
तिसोमं धान्यादिनाकृतं अम्लं धान्याम्लं कुञ्जि
तं जले विगतस्वाभाविकरसत्वात् कुञ्जले
कुञ्जामकारः पृषोदरादित्वात कुञ्जेकलन
कुञ्जलमिति स्वभूतिः अन्यस्तु कुञ्जकि सवता
गतिष्व संज्ञायामिति ण्वुल् केनत्तलेन अजि
कमभिव्यञ्जिरस्य कांजिकं कचयति दीपयति

अग्निं वभाति सो धान्याकविहीस्त्रिवेधनयोः
पृथ्वीकांचिकमिति स्वामी कांचिकं का
तिकं वीरमिति धान्यं चेतरिः अष्टौ कांचिकस्य
८ ॥ सहस्रवेधिजतुकं बाह्लीकं हिंगुरामठ
ठं ॥ विधविधाने सहस्रमिति अनेको पल
त्वां सहस्रं वेधि तेजस्तेनगंधाक्रान्तं करोति शील
मस्य सहस्रवेधि जतुरिव प्रतिकृतित्वात्क
जतुकं चवर्गादिः बाह्लीकं प्राग्वत् हिनो
ति हिंगु पृषोदरादिरिति स्वामी हिममिवहि
मं ईङ्गं गत्वा भवत्वा हिमं गच्छति गुः इतिभट्ट
घ्नादित्वात् गुः पृषोदरादित्वाद्धिमकारलो
पे वहिंगुः इत्यन्ये रमयति रामठकमेवठङ्
ति बाहुलकाड्डमेरपित तत्र प्रवासित्वेन फल
त्वं रामठं पंचहिंगुनः ५ ॥ तत्पत्री कारवी पृ
थ्वी बाष्पिका कबरी पृथुः ॥ तस्य हिंगुनतोः
पत्रं कारवी प्राग्वत् कारवः पत्रीति च पाठः त
त्पत्री त्वचमाख्याति तत्पत्री कारवीति चेति
पृथुः बाष्पमिवेति बाष्पिकेति स्वामी अनौ
काटयश्चेति ईकन् पत्वं बाष्पीका कवरी पृ
थ्वीति प्राग्वत् कवरीति चेति च पाठभेदः
ति स्वामी पंचहिंगुपत्र्याः ५ ॥ निशाख्या
कांचनी पीता हरिद्रा वरवर्णिनी ॥ निशा
ख्यावित्रिपर्यायनामिकेति अर्थः निशाप्रा
ग्वत् कविहीस्त्रिवेधनयोः करोति ल्युट् पृषो
दरादित्वाड्डीर्घः कांचनी पीतवर्णयोगात्पीता
हरति वर्णान्तरं अथवा हृः हरिः पिंगलवर्णः तं द्रा
ति कुत्सितइति हरिद्रा अन्तपवरवर्णा येभाद

रवणिनी पंचहविज्ञायाः ५ ॥ सामुद्रंयत्तु
लवणमक्षीबंवसिरंवनत ॥ समुद्रेभवंसा
मुद्रंयह्लवणंतदक्षीवंवसिरंचस्यात लवणा
तिजाग्रेसमुद्रभववात्रयोरिवाल्हः एषोर
गरिवाल्हवणं श्रक्षणोतिव्याप्नोतिश्रक्षीवंपृ
षोदरादिः नक्षीवंत्यनेनश्रक्षीवंक्षीहमदे
वजर्ग्धेकोवाश्रक्षीवंवन्यातिलेभमत्रभवति
वसलंभेवाड़लकात इतिमहिमक्षोल्यादि
नाकिरचू वसिरंहत्यमध्यंडच्यतेवसिरंवश
कांतोएवंवक्तिरचुवशिवं तालव्यशामिति
माधवः हेकड़्कार्यमस्यलवणस्य २ ॥ सैं
धवोस्त्रीशीतशिवंमाणिमंथंचसिंधुजे ॥
सिंधुनद्यपलक्षितेदेशेभवंकच्छादिभ्यश्च
त्यणश्शीतवीर्यत्वात शीतंशिवंकल्याणक
रंतयोःकर्मधारयः हितालव्योशीतशिवंसि
तेश्शुभ्रं शिवंकल्याणकरंसितशिवंश्रव्यपे
हृत्यादि शीतशिनोतितिशिज्वनिशानेशीतशि
वं हितालव्यमित्यन्ये मणिमंथपर्वतेभवं
माणिमंथंमणिवंधमित्यपिपाठइतिस्वामी
माधवीच शेषंस्वष्टमे चत्वारिमणिमंथसैं
धवलवणस्य ४ ॥ रोमकेवसुकं ॥ शा
भरिदेशेसमानामलवणाकरः तत्रभवंरोम
स्वार्थेकन्रोमकं वसुधनेमहार्घत्वात्तस्का
यतेशह्यायतेश्रान्तइतिकः वस्तेवावसुकं
हिवादित्वात्कत्वं देशांभरिलवणस्य २ ॥
पाक्यंविडंचकृतकेद्वये ॥ पचपतेड़्दंश्च
ह्लोण्यत् चोःकुरितिकुत्वंपाक्यंपाकेसाधु

पाक्यमितिस्वामी विड़ंतिभिनत्तिरसोंतरं
विड़भेदनेइगुपधेतिकः समुद्रनीरमत्रभू
मिभवामध्यदेशेभवंम्लत्रिकांवपाचयित्वा
निष्पादितस्यपाक्यादिद्वये तत्रकृतकेन
क्रिययानिर्वृत्तंकृतकंकृत्रिमेकृतकमलवा
णे ॥ सौवर्चलेक्षकरुचके ॥ सुष्टुवर्चतेदी
प्यतेवर्चादित्वात्कलच् ततः प्रज्ञाद्यण्सौव
र्चलं श्रक्ष्णोतिव्याप्नोतिश्रच्च श्रक्षरोचतेशो
लूयात शिल्पिसंज्ञयोरितिवुन्रुचकेतयो
र्द्वंद्वश्रक्षरुचकेक्लीवे द्वौमिथसौवर्चलाख्यल
वणस्य ३ ॥ तिलकंतत्रमेचके ॥ तत्र
तस्मिन्सौवर्चलेमेचकेकृष्णेतिलति
तितिलस्नेहनेकुन तिलपदेनकृष्णवर्णो
पलक्षणत्वात तिलइवइवार्थेकन्तिल
कं एकं १ ॥ मत्स्यंडीफाणितंखंडविका
रे ॥ मत्स्यंडाकारत्वात्गौरादिःङीषिम
त्स्यंडीशाकेधादिः मृद्रंस्यतिमत्स्यंडीपृषोद
रादिः मत्स्यानमतिरजतिग्रमरोगेमत्स्यंडी
तिवैद्याः फाणतेड़्क्तांतरंगम्यतेप्राप्यते
फणगतौण्यंतात्क्तःफाणितंइक्षुविशेष
स्यरसपाकेखंडयोग्येसारभूतागुटिकाकारा
याजायतेसामत्स्यंडीशुद्धखंडफाणितंखंड
कंइतिख्यातिः एतौखंडविकारौशुभ्रखंड
गुटिकायाःक्रमेणैकैकं २ ॥ शर्करासिता ॥
शृणातिरसनावैरस्यंशृहिंसायांशरःकरन्नभा
केवा सिनोतिबध्नातिरसान्प्रेजिह्वाविस्यःक्तः
सिताशुक्लवर्णावादेत्वादिः द्वेसितशर्करा
याः २ ॥ कूर्चिकाक्षीरविकृतिः ॥ क्षीरस्यवि



रा॰
म॰
३३२
३२२


कृतिः दध्यादि तेन सह श्रावर्त्तितेऽग्नौ शर्करा
लेपाद्या जायते सा कूर्चिका कूर्चिः धातुश्चपि
तो पिन्नूवाहे वा कृतिगणत्वात् भूवाहावेवइ
छव्याः ततः सन्नायो एवल कूर्चा मस्त्वादि इत्ये
तद्योगात् वहनि वा कूर्चिका दध्यामइपयः पा
कं यत्तत्स्याद्धूपिकूर्चिका द्वौरं तक्रेणायस्यके
साभवेत्तक्रकूर्चिका हेद्वौ वसाइति व्योतम्य
२॥ स्यादसालात्तमार्जिता ॥ रसान्नश्राला
ति मूलविभुजादित्वात्कः रसाला मार्ज्यते लो
क्रियते इत्यनेन तद्योगात् मार्जिता मत्स्यश्री
वालंकारयोरिति चुरादिः तत्ते निष्ठायां मस
तेः हृडिः मत्ते रतिम्स जेरजादौ संक्रमे विभा
षा हृडिरिष्यते इति हृडौ मार्जीततः तत्करोती
ति ण्यंतात् क्तः तारकादित्वादित्त चिवामार्जिता
चुरादौ मार्जे शब्दार्थः बाङलकादेत्ति ह्रिषिभ्यः
के मार्जिता चेति पाठायणि सचरुजोत कात्सा
नी मगुडान्नु कनागरा रसा स्याच्छिखरिणी स्त्रि
ह्रेहरसंवाधिः इति रत्नमाला श्रवाढके
सविरपर्के षिनस्यदध्नः खंडस्यशोडश पर
लानि शशिप्रभस्य सर्पिः पलं मधु पलं मरिचं
द्विकर्षशुंठ्याः पलार्धमपिचार्धपलं च दद्यात् सू
क्ष्मे पटे ललनया मृदुपाणिघृष्टा कर्पूररुलि
मरभीकृतपात्रसंस्था एषा वृकोदरकृता
सरसा लायुभर्त्ति ता भगवता मधुसूदनेने
ति सदरभाकृ ॥ स्यात्तेमनं तु निष्ठानं ॥ ति
म्यते श्रार्द्रीक्रियते अन्नमनेनेति तिमेष्टिस्त्वर्णा
द्रीभावे ल्युडिति तेमनं निरंतरं स्थीयते अत्र भोज्या
निष्ठानमिति रसभूतिः हे व्यंजनस्य २॥ त्रि

लिंगं वासितावधेः ॥ इतः परं वासितावः
धे वासितपर्यन्ताः त्रिलिंगा इत्यर्थः ॥ शूला
कृतं भटित्रं च शूल्यं ॥ लोहादिकृता शूला
का शूलं करोतीत्यनेकार्थत्वात् पाके वर्त्तते कृतं
पक्वमित्यर्थः शूलात् पाके इति डाच् गतिः स
मासः भटतिपुष्टो भवत्यनेन भटत्रं तो ग्रहा
दित्वादित्रच् भटित्रं शूल्यं शूले उखे लोवा यत्
त्रीणि शूलपक्वमांसादेः ३ ॥ उख्यं तु पैठरं
॥ उखा स्थाली तत्र संस्कृते उख्ये एवं वत्तयत्
एवं पिठरे स्थाल्यां संस्कृतं भक्ष्यमित्याणि पैठ
रं हे स्थालीसंस्कृतस्यान्नादेः २ ॥ प्रणीत
मुपसंपन्नं ॥ प्रकर्षेनीतं प्रापितं प्रणीतं उ
पश्राधिकं संपन्नं उपसंपन्नं उपाधिक्ये हे पाक
त इपरमादि संपन्नस्य व्यंजनादेः २ ॥ प्रय
तं स्यात्सुसंस्कृते ॥ यसुप्रयत्ने इति कर्मणि
क्तः प्रयस्तं सुष्ठु संस्कृतं सुसंस्कृतं हे तैः
लादिपरिपक्वस्य २ ॥ संस्कृतं सर्पिषा टभ्रा
मापिंबंदापि कं क्रमात् ॥ इत्यनेन तद्योगा
त्सुष्ठु संभृतस्य द्रव्यस्य व्यंजनस्य ॥ स्यात्पि
च्छिलं तु विजिलं ॥ पिच्छा भक्तमंडं तद्योगा
त् पिच्छादिभ्यइलच् पिच्छिलं पिच्छा तु शाल्म
लीवेष्टे मंडे च श्रापश्चायेऽइति विश्वः विजेश्च
लनार्थत्वात् इगुपधेति किः किति इलच् कि
वं च विजिलं विजयिलं च स्यात्पिच्छिलं विज
यिलमिति बोपालितः हे मंड फक्क भक्तजल
फक्क व्यंजनयोः २ ॥ संमृष्टं शोधितं समे ॥
मृजूष शुद्धौ कर्मणि क्तः सम्यक् संमृष्टं शोधितं
हे केशमक्षिकाद्यपनयनेन शोधितस्यान्नव्यं

पं
मृ
333

त्तनादेः २ ॥ चिक्कणं मसृणं स्निग्धे ॥ चि
त्यते सम्यक् ज्ञायते चिती संज्ञाने चित्तेः करणा
कश्चेति तकारस्य चकः चिक्कणं चिक्किण
चित् कणति कणं चिश्च तत् कणं चेति नैक
क्के तकारस्य कत्वमिति स्वभूत्यादयः मसृ
णोति शोभां सवति माशब्दे उपपदे मसेर्वाङ्
कास्त्रक्कृ ण्यपोरित्यादिना कृ णः उवर्णो
तिणत्वं मसृणं ऋणगातौ संप्रसारणं ततः उणा
धेतिकः पृषोदरादित्वाद्वर्णविपर्यय इति स्व
भूत्यादयः स्निह प्रीतौ स्निग्धं ॥ त्रीणि स्निग्ध
स्य चिक्कणनादेः ३ ॥ समे भाविततवासिते ॥ भा
व्यते स्मेति श्रीक्रियते स्म अधिवासकल्कणानि वि
क्तः भावितं वासमुपसेवायां क्तः वासितं ॥
द्वे ग्राहितानुलाति वचने ॥ आपक्वं पौलिरभ्यू
षः ॥ पुलमहत्त्वे इगुपधात्कः पुलं महत्त्वं
तेवाद्य जर्थेकः पुलः ततस्तेन निर्वृत्त इत्यर्थे
ष्ठ तेग मत्वादिञ् पौलि अभ्युपसर्गाहवयोतस्मि
स्थि अभ्युष्यते अभि उष दाहे तस्य जर्थेकः नै
रुक्तो दीर्घः कृषकजायामित्यनेनवाकः अभ्यू
षः उष दाहे वि अभ्युष इत्येकेनोक्तमोहरितो
यवोऽभ्युष इति बोपालितान्रूक्तमप्योषा
भ्युषः त्रीणि तोयमादिहर्णीकृतस्याग्नि
षद्धप्रमह्नत्तेन संस्कृयमानस्य पावग्राह्य
ति ख्यातस्य ३ ॥ लाजाः पुंभूम्नि चाक्षतं ॥
लज्यते भर्ज्यते लजि भर्जने कर्मणि घञ्
लाजाः ते चाक्षतं पुंभूम्नि इति नित्यं पुंलि
ङ्गा नित्यबहुवचनान्ताश्च अक्षाणि धान्यक
र्मणि क्तः क्षतं खण्डितं न क्षतमक्षतं द्वे भ्र

ष्टधान्यादिविकारस्य खेली इति ख्यातस्य २ ॥ पृ
थुकः स्याच्चिपिटकः ॥ प्रथते मुसलप्रहा
रेण विस्तारं गच्छति प्रथ प्रख्याने अकुकः पृथुक
पाक इति कप्रत्यय संप्रसारणं निपातनात्
पात्यंते पृथुकः नेर्विलजित्यनुवर्तते इलच
पिटच्च किकच्चेति पिटच् नेश्चिरादेशः
चिपिटः स्वार्थे कन् चिपिटकः द्वे चिउरा इति
ख्यातस्य २ ॥ धाना भ्रष्टयवे स्त्रियां ॥ धाञो
धाप्तेवस्यन्ते तिभ्योन इति न प्रत्ययः स्त्रीभू
म्नि धानाः ॥ पूपोऽपूपः पिष्टकः स्यात् ॥
पुनाति पूपः नीपादयश्चेति पः कित् पूयी
विशरणेन पूयते पूपः पूर्ववत्पः वलिलो
पः अपउपते अत्रेति वा अपूपः अपूपशब्दे उ
पपदे वपेर्वजर्थेकः यजादित्वात्संप्रसारणं
अन्येषामपीति दीर्घः अपूपः पिष्टं तण्डुला
दिचूर्णं ततः संज्ञायां कन् पिष्टकः त्रीणि पि
ष्टकस्य ३ ॥ करम्भो दधिसक्तवः ॥ घञ्
समावाये क्तिन् निरामीत्यादिना नन् सक्त
वः इत्युपसि क्तः सक्तवः दधिसक्तवः अत्रे
नद्धेजनमिति समासः केन जलेन रभते आ
ह्नायते करम्भः रभेशाह्नेपचाद्यच्च रभेशः
लिहोरिति उ केन जलेन रभ्यते ह्वजिवाक
रम्भो मकारोपधोवकारोपधश्च वकारोपधः
समिश्रमात्रवचन इति स्वभूतिः द्वे दधिमि
श्रितसक्तूनां २ ॥ भिःसा स्त्री भक्तमन्धोऽन्न
मोदनोऽस्त्री स दीदिविः ॥ भस्यते भक्ष्यते भ
सोधातूनामनेकार्थत्वात् इत्याख्यातामभसेः सं
प्रसारणं सश्चेति भिःसा भसत्वेभिनत्तः स वे



तःस्रायतेभक्ष्यते॥भिस्सटेत्वस्याभस्त्वाद्दृत्यते॥
श्रातश्चोपसर्गाद्दृत्यवनेनक्तौभेत्वाद्दिलोपःप्रका
रस्यसकारःभिःसेतिवाभक्ष्यते निस्पसेध्यतेक
र्मणिक्तःभक्तंग्रध्यतेभक्ष्यतेग्रदेर्हे हौवेत्यस्मा
त्पधातोर्न्वेमागमः धकारादेशःग्रंधःग्रनेति
प्राण्यंत्यनेनग्रहस्त्वबाडुलकात्वप्रइतिवाग्र
देःकःग्रन्नाद्दइतिनिपातनात्तनजग्ध्यादेशः
रहाभ्यामित्याहिनारकारयोर्नत्वेग्रन्ने उनत्ति
क्लिद्यतिउन्देर्नलोपश्चेतिपचुनलोपःघ्नवेति
त्वाहिनाग्रनादेशःउदनःदीदिविमहितोर्दी
त्यन्वयइतिरह्यूतिःदीव्येति क्रीडेतिव्यवहृ
तेति द्योत्यतेवाऽनेनहृव्यादयश्चेतिक्किन्न हि
त्ववलोपश्चभ्यासदीर्घत्वानिदिवोहेदीर्घश्चाभ्या
सस्येतिक्किन्नहित्वादिकेचदीधिविदितिव्याख्या
स्यतं पद्द्रभक्तस्य ६ ॥ भिःसटादग्धिका॥
ऊत्तिताभिःसाभिःसटाबाडुलकात्वहोकृ
त्स्वश्चयथाग्रसदीवद्दहीत्यादि देति ग्रत्ता
दृग्धात्तंसायोकन्दग्धिका द्वेदग्धभक्त
स्य २ ॥ सर्वे रसाग्रेमंडमस्त्रियां ॥ सर्वेषां
दध्यन्नादीनामग्रेरसेमंडंमडिभूषायांघञ्
यच्च द्वेसर्वरसाग्रभागस्य २ ॥ मासराचा
मविस्रावामंडेभक्तसमुद्भवे ॥ मस्यति प
रिमातिमसीपरिमाणेण्यंतात्वाहुलकाद्वे
रह्निस्त्वरत्वणिलोपोमासरःचमेरात्रेवं
तद्धत्वाण्यर्थत्वात्कर्मणिग्रन्त्याचामःविद्र
वतित्वस्रुतानाविस्रुतौ णेतावितकर्मणिग्रेचवि
स्रावः त्रीणिभक्तमंडस्य ३ ॥ यवागूरुष्णि
काश्राणाविलेपीतरलाचसा ॥ यौतिमिश्री

भवतिपाकमिश्रणेनयाक्वचिभ्योन्नजाः श्रजग्र
च इत्याग्रूक्रप्रत्ययः यवागूःउष्णाश्रहाणतत्वग्र
ष्णकौस्मिकेचसंज्ञायामितिकन उष्णिका
श्रापयतिश्रापाकेकर्मणिक्तः संयोगादेरा
त्वाहिनानिपातनत्वेणत्वेचश्राणाविलेपति
विलेपीपचाद्यजन्तात्वगौरादि ङीष् तरति
व्याप्नोतिमंगेरलचूबाडुलकात्त्वरतेरप्यल
चू तरलावैद्यकेभक्तभेदोनाह्तःसेतियवा
गूः पंचयवागवाः ५ ॥ गव्यंत्रिषुगवांसर्वं
गोविड्गोमयमस्त्रियां ॥ गोरिदंगविभवंगो
विकारोवयवोवासर्वंगव्यंशाहत्वाच्चोगोपय
सोर्यत्वतोयीतिवांतादेशः ॥ गोवीतिगा
वांविड्गोश्चपुरीषइतिमयट्गोमयंद्वेगोम
यस्य २ ॥ तत्तुशुष्कंकरीषोस्त्री ॥ तद्गोमयं
विशेषेणशुष्कंशोषंगतंकीर्यतेशोषायविति
प्तंक्रियतेकृङ्हृभ्यामीषच्चितिईषन्करीषं २
एकंशुष्कगोमयस्य १ ॥ दुग्धंक्षीरंपयः
समं ॥ दुह्यतेस्रावयतेदुग्धंक्षीरंपयःप्रा
णीणिदुग्धस्य ३ ॥ पयस्यमाज्यदध्यादि ॥
पयसोविकारःपयस्यंगोपयसोर्यत्तकिंतदि
त्याहआज्यदध्यादि आज्यंघृतंदधिइत्यादिग्र
हिनात्तक्रनवनीतग्रहः एकंघृततक्रदध्या
देः १ ॥ द्रप्संदधिघनेतरं ॥ घनात्कठिना
दितरत्तरलंदधिदृप्यंत्यनेनदृप
प्रीणनेग्रंज्ञाहयश्चेतिपधातोरमागमश्च
प्रत्ययस्यसगागमःद्रप्संएकं १ ॥ घृतमा
ज्यंहविःसर्पिः ॥ घ्रियति जिघ्येतित्वरंतिघृत
रणदीप्त्योःग्रंजिघृभ्यःक्तःघृतंग्रनक्ति

दा॰
मं॰
३४५
325

द्रीभवति तत्रयाणां घृतानां अंजस्य क्रिमवा
णामितिवि अंजेः संज्ञायामिति कप् आज्यं ह्य
तेऽहं अनेनवाहूयतेऽस्माने अविशेषाज्य ह
विच्याहिभ्यः इत्तितीमिह्यविः सर्पति सरणा
घृतमित्येवं वडिसिसर्पिः चत्वारि घृतस्य ४
॥ नवनीतं नवोद्धृतं ॥ मथितात्तक्रादुद्धृत्या
त्वा नवं तत्कालमुद्धृतं नवनीतं हृतयोनिः
आत्त एव नवोद्धृतमित्युक्तं एकमेकं तन्नाम्नि मं
योगस्य नवोद्धृतस्य मथितत्वेऽपि विकारस्योऽल
नीति ख्यातस्य १॥ तत्तु हैयंगवीनं यत्ह्योगो
दोहोद्भवं घृतं ॥ अतीतेऽहनि ह्यः अत्र ह्योगोद
काशात् दोहोद्भवं यत्तद्वृणाति उद्धृतं यत्तद्घृतं त
त् हैयंगवीनं पदवाच्यं ह्यः गोदोहस्य ह्यस्यवि
यंगवादेशः हैयंगवीनं संज्ञायामिति साधुः
एकमेकं तत्र पर्यायशिला हृदमुत्पन्नस्य घृतस्य
१॥ दंडाहतं कालशेयमरिष्टमपि गोरसं ॥
दंडेन मंथदंडेनाहतं मालोडितं दंडाहतं मंथ
पात्रं कलशिस्तत्र भवं कालशेयं हतिकृति
कलशिवस्तीत्यादिनाफङ् कालशेयं अरि
ष्टं प्राग्उक्तं गोरसोद्भवं नहिकारात्कार्यं कर
णमेदात् तक्रयायश्चोलमपि गोरसः चत्वा
रि सामान्येन घोलस्य ४ ॥ तद्विशेषान्नाह
तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बुनिर्जलं ॥
पादाम्बित्यादि यथाक्रमं पादादिभिः सम्ब
ध्यते यत्पादाम्बुघोलं तक्रं भागद्वयं यत्र दधः
चतुर्थो भागो जलस्य तत् तक्रं तन्त्रुवन्त्रुहत्या
दिहंकोधातुः गतपथेः उंचतितन्तरलत्वात्क
च्छतिमथ्यायीतिरक्कनलोपः न्यजकादित्वालो

त्वं अर्धंदधि अर्धं जलं यत्र तदुदश्वित् उदके
नश्वयतिवर्धते ऽदुओश्विगतिवृद्ध्योः क्विप् तत् क
उदकमर्धं टजस्वुदादेशः तदश्वितोन्यत्र मथ्या
दितिनिर्देशात् समप्रमाणाम् मथ्येविलोडने क्तः
मथितं निर्जलं क्रमेणैकैकस्य १॥ मंडं द
धिभवं मस्तु ॥ दधिभवं मंडं मस्तु शाह्वया
च्छं मस्तोपरिणामे शितनिगमी त्यादिनात्र
न् मस्तु मंडं प्राग्उक्तं एकं १॥ पीयूषोभि
नवं पयः ॥ पीयते ऽहः पीङ् पाने अन्येभ्यो
पीतिहृश्यते इतिक्विप् विच्चपेः पानकर्त
ॠषहिंसायामिति पथाक्कः पेः पूषो नाशि
ताम्पपेऽपूषः पेयूषो मूर्धन्योतः नवप्रसू
तायागोः सप्तरात्रेयावत्तमलिनं दुग्धं पयः
पेयूषमुच्यते नवप्रसूताया गोः क्षीरं सप्त
दिनावधीति वाचस्पतिः ॥ अशनाया बु
भुक्षा क्षुत् ॥ अशनमिच्छतीति क्यच् अ
शनायोदन्यायनायेतिसाधुः क्वचिचेत्य
स्याः प्रवादे दीर्घः अशनायेति स्थिते प्रत्य
यादित्यकारः टाप् अशनाया भुजेरिच्छाम
नि भुभुक्षा खेः संपदादित्वात् क्विपक्षुत्
भाक्ष्रिमत्तेदापित्त्वात् च ज्ञीणिबुभुक्षायाः
३॥ ग्रासस्तु कवलार्थकः ॥ ग्रस्यते ग्र
सु अदने कर्मणि घञ् ग्रासः केन जलेन व
लतीति ऽपीतिकः पचाद्यच् वाकहवर्णे
ने हषादित्वात् कलचकवल इत्यन्ये कव
लार्थोऽर्थोयस्य स कवलार्थकः हे भक्ष्यादि
ग्रासस्य २॥ सपीतिः स्त्री तुल्यपाने सग्धिः
स्त्री सहभोजने ॥ समानापीतिः सपीतिः स

वा॰
सु॰
३२६
326

मानस्य छेदः सीति वल्लादेशे च सिति नमो हृ
लि वेत्सु पक्षालोपः तथोहौ धा इति तिनस्य धवे
फलो फलीति सलोपः जश्त्वे हकारस्य गका
रः एवं वत्समासः सधिः सह भोजनमिति
सपीतिसमासः हे सह भोजनस्य २ ॥
उदन्यात्तु पिपासा तृड् तर्षः ॥ उदकस्योदा
उदन्यास्य प्रशनः का च प्रशनाये न्याहि
नाम्नात्पु उदन्नादेशः एवं वत्त्र प्रत्ययात्तल
पुउदन्यापाते मिछापिपासा जिन्न्वापिपा
सायांभावे स्त्रियां संपदादित्वात्क्विप् तृट्
घांता भावे च जित तर्षः चत्वारि पिपासायाः
४ ॥ जग्धिस्तु भोजनं जेमनं लेप आहारो
निघसो न्याद इत्यपि ॥ अदेः क्तिन अदो
जग्धि हित्यादिना जग्ध्यादेशः जग्धिः सर्वे
एवं वत्तभुजेः ल्युटि भोजनं वमुकभुजन्यु
भुज इत्यत्र ति भुज पीतिके चित्पठंति ततो
ल्युटि गुणे च जेमनं जमेक्त्त जमनं च लिपे
र्घञि लेपनामनेकार्थत्वेन भोजनार्थत्वात्तद
जिलेपः आङ्पूर्वात् हृ धातोः भोजनार्थत्वा
त्तद जू आहारः अदेः नौण चेत्य पत्र जयो
तिघस्मादेशः निघसः आदेः णप्रत्यये उ
पधा वृद्धौ न्यादः सह भोजनस्य ७ ॥ सौ
हित्यं तर्पणं तृप्तिः ॥ सुहितः तृप्तः तत्रा
वः सौहित्यं तृपेः ल्युट् क्तिनौ तर्पणं तृप्तिः
त्रीणि तृप्तेः ३ ॥ फेलको भुक्त समुज्झितं
एवं भुक्तं पश्चात्समुज्झितं संत्यक्तं तत्त फे
ला शब्द वाच्यं फेलति विशीर्यति पचाद्यच्
फेल गतौ कर्मणि वा गौरादि इ लइत्यकारे

फेला एव केलि फेलकः फेलिरण्यत्र इह शण्तरति
माधवी हेडुन्तस्य ३ ॥ कामं प्रकामं पर्या
प्तं निकामेष्टं यथेप्सितं ॥ प्रायेणस्वभावात्
क्रियाविशेषणान्येतानि काम्यतइति कर्म
णि जंतात्कर्मणि विकामं प्रकामं पर्याप्तं
चोपेक्तः पर्याप्तं र एवं वत्निकामं इषेः क्तः इष्टं
आप्तुमिष्टं इप्सितं स्थानतिक्रमो यथेप्सितं
षड् इष्टानतिक्रमस्य ६ ॥ गोपे गोपाल
गोसंख्य गोदुगाभीर वल्लवाः ॥ गाः पाति र
क्षति आतइति कः गोपः गोपालयति कर्म
ण्यण गोपालः गाः संचष्टे संख्योतिवासं
ख्यइतिकः गोसंख्यः गांदोग्धि सत्सूद्विषे
ति क्विप् एकाचइत्यादिना दस्य धः दादे
र्धातोः घः इति घत्वे जश्त्व चर्त्वे गोधुक् अहीनः
मूलविभुजादित्वात्को वा गोदुहः गोपगोदु
ह वल्लवाइति त्रिकांडशेषः आसमंतात्वामि
यं राति आतइति कः आसमंतात् अभिमुखेभी
रयति भीरयति आभीरः इति स्वामी वल्लते
वल्लसंवरणे वल्लः वरणे च जत्तयो गाद न्योव
पीति वः वल्लवः षड्गोपालस्य ६ ॥ गोम
हिष्यादिकं पादबंधनं ॥ गोमहिष्यादिकं
बध्यतइति कर्मणि ल्युट् पादे बंधनमस्य
बहुव्रीहिः अहिनावेष्टादिका अथवा हः
अहिना गोमहिष्यादिकं धनं यहनामिदं
यादवयहनो हि प्रथमं गोधनमभूदिति वाते
ति स्मृत्याद्युपः गवादियादवविन्नेबोपालि
तः एकं १ ॥ हौगवीचरे गोमान्गोमी ॥ ग
वामीश्वर इति अवादेशे गवीश्वरः बड्गवो यो

गां
मं
३३९
377

न्मत्रपि गोमान् पंचेत्योत्स्नातमित्येत्यादिना
गोमी निपातितः त्रीणि गोस्वामिनः ३ ॥ गो
कुलं तु गोधनं स्याद्गवां व्रजः ॥ गवां कुलं स
मूहः गोकुलं गवां धनं समूहः गोशाला स्यादो
धनशाला संचवाची गोकुलं गोधन इति व्या
डिः व्रजः समूहः गोचरमेवं वेत्यादिना साधुः
हे गोसमूहस्य २ ॥ गव्याशितं गवीनं तत्क्षा
वो यत्राशिताः पुरा ॥ उक्षा भद्रो बलीवर्द ऋ
षभो वृषभो वृषः अनड्वान्सौरभेयो गौः ॥ उ
क्षति सत्रादिना स्यिति शुचं सिंचति उक्षमेवं
नेवाङ्कलंकात् एषितनीतिकोनिन् उक्षा
हृति मंगलं करोति भद्र टि कल्याणे स्फायीति
रक् भद्रः बलं वर्धयति बलीवर्दः पृषोदरादिः
ऋषति गच्छति ऋषी गतौ ऋषेति अभिजित्व
तृहन्तौ ऋषिवृषिभ्यां कित्त्वेति अभक् ऋषभः
वृषभः वर्षति रुगुपधात्कः वृषः अनः श
कटं वहति अनसि वहेः क्विनस्य तच्चेति क्वि
पुंसमुडः वहेः संप्रसारणं च वत्वर तु डुह्मो
वोमु दा तद्भूत्वा सावनडुहे इति नुं अनड्वान
गोवादि हेः पिस्त्रियां वेत्याम् इअनडुही अनड्व
हीच सुरभेरपत्यमितच्छानि जढ इति ढकि सौ
रभेयः गच्छति गौः गमेर्डोदिलोपः सौरभेय
सादृश्ये च यादृगुमान् अन्वयेतरभेदो नाटतः
न वृषभस्य ९ ॥ उक्ष्णां संहतिरौक्षकं उक्ष्णां
संहतिः समूहः औक्षकं गोत्रोक्षोष्ट्रादिना वु
ञ् एकं वृषभसमूहस्य १ ॥ गव्या गोत्रा ग
वां ॥ गवां संहति हेट् खलगोरथात् इति यत
गव्या पञ्चेइनित्र कथ्यच इति त्र प्रत्ययो गोत्रा

हे गोसंघस्य १ ॥ वत्सधेन्वोर्वात्सकधैनुके
॥ वत्सानां गोत्रोक्षेत्यादिना वुञ् वात्सकं ध
धेनूनां हेट् अचित्तहस्तिधेनोष्ठक् धैनुकं १
क्रमेणैकैकस्य १ ॥ महोक्षो महोक्षः स्या
त् ॥ महान्महाबलो वृषः महोक्षः अचतुरा
चेति अचतुरेत्यादिना साधुः महोक्षः ॥ वृ
द्धोक्षस्तु जरद्गवः ॥ जरन्वृद्धश्चासौ गौश्चे
ति गोरतद्धितलुकीति टच् जरद्गवः वृद्धश्चा
सावुक्षा चेति एवं वटच् हे वृद्धवृषभस्य १ ॥
उत्पन्न उक्षा जातोक्षः सद्योजातस्तु तर्णकः १
शकृत्करिस्तु वत्सः स्यात् ॥ उत्पन्नोत्र एव
स्वभावः स्पष्ट बलीवर्दभावो जातोक्षः एवं व
त् ॥ दम्यवत्सतरौ समौ ॥ दमनार्हो दम्यः
योरुपधादिति यत् वत्सत्वं तनुत्वं वत्सोक्षा
त्यादिना ष्टरच् वत्सतरः तनुत्वं च वत्सस्य द्वि
तीयवयःस्पर्शः हे ईषद्बाल्यक्रान्तिं किंचित्स्थ
ष्टानामनास्य बलीवर्दभावस्य दम
दाहृतिख्यातस्य ॥ आर्षभ्यः षण्डतायोग्यः ॥
वृषभस्यर्हतीत्यार्षभ्यः ऋषभोपानहो ञ्यः
षण्डताया योग्यो भविष्यत्षण्डः वत्सः आर्षभ्यः १
॥ षण्डो गोपतिरिट्चरः ॥ षणोति ददाति गा
में षण खण्डाने जमन्ताड्डः षण्डो मूर्धन्यादिः गवां
पतिः गोपतिः ईषणीत्रड् इषु इच्छायां भावे
संपदादित्वात्क्विप् इट् इषा इच्छया चरति ग
च्छति इट्चरः स्वेच्छाचारीत्यर्थः इत्वर इत्येके
इति तत्स्वामी षण्डं पद्मादिसंख्यातेषु स्यात्षण्डोऽ
पि तेषु मानितिमूर्धन्यादौ डान्ते मेदिनिः त्रीणि
षण्ड इति ख्यातस्य ३ ॥ स्कन्धदेशस्त्वस्य वहः ॥

गं
मं
३२८
३२४

वहतिकगमनेनगोचरसंचरेत्यादिनासाधुः
एकं २ ॥ सास्नातुगलकम्बलः ॥ सीतिस्य
पितिसहलम्बमानत्वात् घसस्त्वेसास्नासा
स्नेत्यादिनासाधुः गलस्यकम्बलोगलकम्ब
लः कम्बलोनागराजेस्यात्सास्नाप्रावरयोः
क्रिमाविति विश्वः एकंगवांगलेलम्बमान
स्यमांसचर्मखंडस्य २ ॥ स्यान्नस्तितस्तुन
स्योतः ॥ णसकौटिल्येक्तः नस्तःसंकृतोऽस्या
प्रातिपदिकाज्जातार्थ इति णिचुततःकर्मणि
क्तः नस्तितः यद्दानसेर्वाडलकात् इतिसंग्र
मीत्यादिनातत्र नस्तासाकृतास्यएवंवस्तोणि
चुतरेनात्क्तःनस्तितः नासिकायांसवाविद्ध
मानाधारीरावयवायत् नस्तनासिकायांयत्न
सिद्धेइतिनसादेशः नसाहृपादेनोसारज्जु
नयार्थतःस्योतःनस्योतः नस्तायान्वतःस्योतः
नस्योतइतिवाचस्पतिकः द्वेरज्जुस्यूतनासिक
स्य २ ॥ यंप्रसध्यस्त्वमहिपष्ठवाहः ॥ प्रष्ठ
वाड्युगपार्श्वगः ॥ प्रष्ठसप्रमानिनेवहतिव
हश्चेतिण्विः प्रष्ठवाड् प्रोष्ठः एवंरेफसहित
एकारं स्वभूत्वाहयःपेट्टुः स्वामीतेपंवसप्रष्ठे
वावषंवहतिइतिपष्ठवाड् षष्ठोरवादिवणो
लोपेनसाधुत्वमित्यन्ये रेफरहितमेवपकार
माह युग्यमेवसर्ववैदिकसंमतःपाहः युगा
स्यस्कंदकाष्ठस्य पार्श्वंगच्छतिगन्तोऽपिदृ
श्यतइतिगमेःडःयुगपार्श्वगः द्वेदमनार्थे
स्कंधेपार्श्वेचबद्धाभ्यस्यमानोक्षस्यवृषस्य २ ॥
युगादीनांतुवोढारोयुग्यप्रासंग्यशाकटाः
॥ युगस्यवोढातद्वहतीत्यर्थेतद्वहतिरथ

युगप्रासंगाख्यदितियत् युगपःहस्यानोटस
नार्थस्कंधेयच्यत्कोऽसमासन्यतेतन्त्रासंगःक
संज्ञिरुत् तद्वहतिएवंवत्तयत् प्रासंग्यः शा
कटंवहतिशकटाद्यणिशाकटः त्रयमेषांकैक
स्य २ ॥ खनतितेनतद्वोढास्येदंहालिकसै
रिकौ ॥ हलेनसीरेणचखनतितयोर्वोढा
तस्येदमित्यर्थेठञ्तेनदीव्यतेत्यादिनाठक् ह
लसीराट्ठकंहालिकःसैरिकः द्वेउक्तार्थेनाग्नी
२ ॥ धुर्वहेधुर्यधौरेयधुरीणाःसधुरंधराः ॥
धूर्वैतिरथलांगलादेःधुरंभारंवहतिएवंवहः
धुरोयत्ढकौधुर्यःधौरेयः खः सर्वधुरादिति
योगविभागात् खःसर्वधुरीणः धुरंधारयतिसं
ज्ञायांभृतृवृजीत्यादिनाखच्चवाचंयमपुरंदरे
तिचकारस्याउजस्सूसंयुगार्थत्वात् खच्चिधुरंध
रइतिन्यासः पंचरथलांगलवहनस्याश्वस्य
घाटेः ५ ॥ उभावेकधुरीणैकधुरावेकधुराव
हे ॥ एकस्यैवरथस्यलांगलस्यवायोधुरंवहति
सएकधुरीणादिपदत्रयवाच्यः एकाचासौधु
श्चेतिएकधुराऽस्मैस्यादित्यादिनासमासांतःता
वहतीत्यर्थेएकधुरात्खेतिखःएकधुरीणःल
कृपत्येलुक्तद्धितलुकीतिटापोनिवृत्तौएक
धुरः ॥ सतुसर्वधुरीणःस्याद्योवैसर्वधुरावहः
॥ यःसर्वासांरथ्यादिसंबंधिनीधुरंवहतिससर्व
धुरीणः वैशब्दोऽवधारणे द्वेसर्वभारवहन
समर्थवृषभस्य २ ॥ माहेयीसौरभेयीगौरुस्रा
माताचशृंगिणी अर्जुन्यघ्न्यारोहिणीस्या
त् ॥ गोकस्त्रीसौरभेयीडुल्लामहीतिनिरुक्तं
महाः गोःअपत्यंस्त्रीभ्योढक्माहेयीमह्याते

गा॰
मं॰
३३८
289

एच्यते महदुक्षायां च जश्रेष्ठः महा महाया॰
पत्यं माहयोति स्वामी सौरभेयः उक्षः ततो॰
क्षुसौरभेयो गोः प्राग्युक्ता गोशब्दो मात्वशब्द॰
स्तु नामांतरमाह चर्यात् स्त्रीलिंगः वसतिवीर॰
मस्यां मस्या यो तिरश्च मे प्रमाणेनाव उत्तमा
ता प्राग्युक्ता मातरी गोजननन्यो हेडइति महः श्र
गयो मात्र श्रृंगिणीश्रजेनोवर्णयक्षः स्त्रिया
मजेनी नहन्यत इत्यघ्न्यात्यश्चेति यक्षरोहिणि
जायते प्रादुर्भवत्यः वर्णरोहिणी नवस्रो गा॰
व्याः ५ ॥ उत्तमा गोषु नैचिकी ॥ उत्तमा ष्ठ
मलक्षणवात उत्कृष्टानी चैश्चरति चरतीति
हक श्रय्यायानो भमात्रे टिलोपः नैचिकी नि॰
चिकं तच्छिवे हेमेइ इति रभसः तत्प्रशस्तमस्या
अस्तीति ज्योत्स्नेत्यादिना णिवा नैचिकी गौः
हत्तमा तु निचिकीति नाममाला मेत्ता एवेक॰
त्वाहरुआभावः पक्षे २ ॥ वर्णादिभेदात् संज्ञाः
स्युः शबलीधवलादयः ॥ वर्णादित्यादि
ना प्रमाणावयवभेदग्रहः शबलीधवल्यादि
यः संज्ञा नामानि स्युः शबली त्वचतो णिच्व
श्रयी ग्राद्य चिशवलेति स्मृतिः शबलीति श्रु
त्यपाहः धवली च शबली वत्प्रमाणभेदा॰
ह्रीढ्वा वामनेत्यादिप्रयोगः अवयवभेदात्
लम्बकर्णीवक्रश्रृंगीत्यादयः वामनेनमह॰
हस्थितः गोवर्णीशबलाइति टार्थ तप्रयोगः
पशाहः इत्युक्तं ॥ द्विहायनी द्विवर्षा गौः ॥
द्वेहायनेयवः प्रमाणमस्याः इत्याद्वीयस्या॰
हजोऽस्त्रिन्नवति नित्यमिति ल्डक द्विवर्षा हे २
॥ एकाब्दा त्वेकहायनी चतुरब्दा चतुर्हायनी

एवं त्र्यब्दा त्रिहायनी सर्वे एवं वत् हे २ ॥ उ॰
च्यन्ते कामयन्ते वृषैः ॥ वशा वन्ध्योऽश्चत्यप॰
वशा वभाति प्रसूतिं वध्याग्र द्याधित्वात्वय॰
वृ उपधालोपाभावश्च द्वे वंध्यायां गवाः २॥
अवतोका स्रवद्गर्भा ॥ अवगलितं तोकमप॰
त्यं यस्याः २ ॥ अथ संधिनी आक्रांता वृष
भेण ॥ औचित्याद्धृतमती वृषभेणाक्रां॰
तानिष्पादितमैथुना सा गर्भेण संधानं सं॰
धातयोगात् संधिनी २ ॥ अथ वेहद्गर्भो॰
पघातिनी ॥ अन्त्यतो हष्योपगमा अस्या॰
गर्भपातः स्यात् सा वेहत् वेहत्ति गर्भं नाशयत्
वेहत्वेहत् इति क्विपि निपातनात् इति
त्व माधवी हे अन्त्यतावपि हष्योपगमाद्यस्या
गर्भपातः स्यात्तस्याः २ ॥ काल्योपसर्या
प्रजने ॥ प्रजनने प्रथमगर्भग्रहणे का॰
ल्याप्रकाला औचित्याहृत्तयोगानेतरप्रा॰
प्राः कालीस्यादिति कालायात् अरणमती
या वृषभेणोपसरणीया सोपसर्या उपस॰
र्या काल्या प्रजनहिति यहैत्त निपातः ॥ प्र
ष्ठौही बालगर्भिणी ॥ सा बाला सती गर्भि॰
णी प्रथमगर्भेत्यर्थः प्रष्ठेऽग्रे पवहति वहु॰
श्चेति खिः वाह इति ऊठ्प्रवाह इत्यद्व पत्ये॰
धतीति हृद्धिः प्रष्ठौही पंचमषष्टवावर्षेव॰
हति पष्ठेन वृषभं वहतीति वा पष्ठौही ए॰
होही च पष्टवाडिति पष्टो दरादिः प्रष्टवाह॰
वमेपष्ठौही चमेवेदाश्रेचमे ॥ पष्ठौही द॰
ति ण त्या हो वेदे कल्पे च केवलः पकारप॰

वेत्यभिधाः ॥ स्यादचंडी तु सुकरा ॥ श
स्याः सुखेन बंधनादि क्रियते सा अचंडी शं
पनेत्यर्थः सुखं करोति जनयति सुकरा
द्वे सुशीलायागोः २ ॥ बहुसूतिः परेष्टुका
॥ बहुसूतिः प्रसवः बहुसूतिः परिमिति
इष्टे बोडुलकात्तुः किंतु पुत्रेय परेष्टुः स्वार्थे
कन् परेष्टुका द्वे बहुप्रसूतायागोः २ ॥
चिरसूता वष्कयिणी ॥ चिरं बहुकालं प्रसू
ता चिरसूता वष्कति परिक्रामति वष्कयः चिर
कालीनो वत्सः औणादिकोयन् तद्योगाद्व
ष्कयिणी एवं वहादित्वाण्णत्वं वष्कयस्यैकहा
यनो वत्स इति शाकटायनः वष्कयेन नीय
ते संपदादित्वात् क्विप् ततः सर्वतः क्विन्नर्थो
हिति ङीष् वष्कयणीति सुभूत्याद्ययः अग्र
मेव बहुसंमतः पाठः द्वे चिरप्रसूतायागोः
२ ॥ धेनुः स्यान्नवसूतिका ॥ धयंत्येनां धे
न्वादयश्चेति नुप्रत्ययो निपातितः नवमचि
रं सूता प्रसूता नवसूतिका स्वार्थे कन् नव
प्रसूतायागोः ॥ सुव्रता सुखसंदोह्या ॥ सु
खेन संदोह्यते शोभितं डहि [illegible] वेति पदे
शान्त सुखसंदोह्या ॥ पीनोध्नी पीवरस्तनी
॥ पीनं स्थूलमूधो यस्याः पीनोध्नी ऊधसोऽन
ङ् बहुव्रीहेरूधसो ङीष् पीवरः स्थूलः स्तनो
यस्याः स्वांगाच्चोपसर्जनादिति ङीष् पीवर
स्तनी द्वे स्थूलोधसोगोः २ ॥ द्रोणक्षीरा द्रो
णदुग्धा ॥ द्रोणमानभेदः तत्परिमितं क्षीर
मस्याः एवं द्रोणपरिमितं दुग्धं दोग्धि वा इति

दुग्धः कप्रश्चेति कप् वश्चोत्तरादेशः द्रोणदु
धा द्वे द्रोणपरिमितदुग्धदावत्याः २ ॥
धेनुष्या बंधके स्थिता ॥ गोमीहि पीतादुग्धबं
धके स्थिता धेनुष्या संज्ञायामिति साधुः ॥ स
मांसमीना साया एव प्रतिवर्षं प्रसूयते ॥ या
प्रत्यब्दं प्रसूयते सा समांसमीना वर्षे वर्षे विजायते
प्रसूयत इत्यर्थे समां समां विजायते इति खः
एवं पदे सुपोलुग्वाच्यः इति भाषावृत्तिः ॥ ऊ
धस्तु क्लीबमापीनं ॥ वहति पयोऽनेन संप्र
सारणं चेत्यूहं ज्ञे वहेर्धो दीर्घश्चेत्यसुन् दी
र्घश्च ऊधः ओप्यायीह डीकः श्राद एवं स्याध्य
नेवेति पीभावः ओहितश्चेति निष्ठानत्वे आ
पीनं द्वे आप्यानमिति ख्यातस्य २ ॥ समौ शि
वकीलकौ ॥ स्यति गात्रकंडूं शिवः सर्वनि
घृष्वरिषलषशिवपद्मप्रहेष्वाने चेति व
न् प्रत्ययांतो निपातितः कील्यते बध्यतेऽत्र
कीलबंधे घञ् स्वार्थे कन् कीलकः द्वे गो
गवादि गात्रकंडूयनार्थे निखातस्य काष्ठस्य
खुंट इति ख्यातस्य २ ॥ न पुंसि दाम संदाने
॥ द्यति खंडयति बहिर्निर्गमं दीयते बध्यते
नेन वा आतो मनिन् दाम स्त्रियां मन इति ङीप्
प्रतिषेधः दाम दामनी दामानि पक्षे डाबुभा
भ्यामिति डापि दामा दामे दामा इति संदानं दा
न संयमनार्थः सन्दीयते बध्यतेऽनेन संदा
नं द्वे पाशनिरिति ख्यातस्य २ ॥ पशुरज्जुस्तु
दामनी ॥ पशूनां रज्जुः दाम्नैव दामनी प्रज्ञा
दित्वात् अण् अन् इति प्रकृतिभावः डिङ्गच्छाणानि
त्यादिना ङीपू नित्यं संज्ञाछंदसोर्ङीप् इति तत्त्वा

ग॰
मं॰
३३९

मो कविद्धेधनीतिपादइतितत्सम्भूतिः वस्ता
नोयोपालीकोलेहीमनोपाशपाशितेतितिश
योगः द्वैवत्सचोटकादिवरणपाणस्य २ ॥
वैशाखमंथमंथानमंथनोमंथदंडके ॥ वि
शाखास्तत्रातं करणत्वविशाखासप्रयोजन
मस्यविशाखोपाध्यामंथदंडयोरित्यणवैशा
खः मथ्यतेनेनमथः पुंसीतिघः घञ्वामंथवि
लोडनेपचमंकिरित्यचइदेतोमंथइत्यनेनानः
मंथेःश्वानचिमंथानइतिस्वामी पथिमथिम
थिन् इतीत्वर्जनामस्थानेइत्यत्वंथोः थइ
त्यादेशः दीर्घत्वंमंथानः मंथनेमंथः मंथार्थो
दंडोमंथदंडः ततः कन् मंथदंडकः पंचमं
थदंडस्य ५ ॥ कुठरोदंडविष्कंभः ॥ कुठति
गतिप्रतिघातिकुठरोतिप्रतीघातेकुठस्तो
त्वरप्रत्ययः कुठरः दंडेविष्कंभातिविधारय
तिकर्मण्यणदंडविष्कंभः स्मृर्धन्यमध्यःस्वे
स्तंभा दावाकर्षणार्थेरज्वामंथदंडोयत्रबं
ध्यतेतस्य ॥ मंथनीगर्गरीसमे ॥ मथ्यते
स्यांमंथनीत्युट् गर्गेतिशब्दायतेगरतइति
कः गौरादिः गर्गरी द्वेमथ्यमानदध्याधारपा
त्रस्य २ ॥ उष्ट्रेक्रमेलकमयमहांगाः ॥ उ
ष्यतेदह्यतेमरावितिउषिमषिकिदितिष्ट्रन्
उष्ट्रः क्रामतिक्रमःकादित्वात्कः पलंकमाणंम
इतितत्सम्भूतिः क्रमेवीडुलकादेलच् प्रत्यय
इतिमाधवीमयति मयगतौपचाद्यच् मयः
महांत्यंगान्यस्यमहांगाः चत्वारिउष्ट्रस्य ४ ॥
करभः शिशौ ॥ प्रकरणादुष्ट्रस्यशिशुः कर
भः किरतिक्षिपतिग्रीवांकृशृशलिवार्हिभ्योभ

चूकरभः रभतेउत्सुतिरभेपचाद्यच् कंशि
रोरभमस्यशिशुकरभः इत्यन्ये एकं २ ॥
करभाःस्युः शृंखलकादारवैःपादबंधनैः
॥ करभाणांपादेषुपलायनाभावायदारु
मयापाशाग्राममंजतेतैः शृंखलाद्रूपेक
येताःशृंखलमस्यबंधनंकरभइतिकन्
शृंखलकाः एकं १ ॥ अजाछागी ॥ अ
जतिगच्छतिप्रायेणोन्नतप्रदेशांपचाद्यच्
टाप् अजा अजाद्यदंतइतिनिर्देशान्नवीभा
वः ॥ पत्रादिकंछ्यतिछोछेदनेच्छाप्रख
डिभ्योगकुछागः जातेरितिङीषछागी द्वे
अजायाः २ ॥ तभच्छागवस्तच्छगलका
अजः ॥ तभ्नोतिपचाद्यच्चुराभस्तभहिंसा
यांइत्युपधात्कः तभइतितत्सर्वस्वंगधवस्त
अर्दनेचुरादावचुवस्तःछ्यायतेछिद्यतेसौ
छोगच्छरूक्षछेतिछगलः अजउक्तोपव
पंचच्छागस्य ५ ॥ मेढ्रोरभ्रोरणोर्णाय
मेषवृष्णयएडकः ॥ मेहतिमिहसेचने
ष्ट्रन्मेढ्रः उन्नतिशाम्यति अमेरन्तेभ्योपो
तिडःनैरुक्तःरकारःउरभ्रःरणतिरणगतौ
अनेन्नछ्येतिकुनदउत्वादेशः रपरत्वेउरणः
ऊर्णामेषलोमतद्योगात्तऊर्णायुःशुन्
ऊर्णायुः मिषतिस्पर्धतेमिषस्पर्धायांपचा
द्यच् मेषः वर्षतिसिंचतिवृषसेचनेस्ताणिवे
णिवृषिणिमसिवृषिणिभ्यइतिनिः वृष्णाभावश्च
निपात्यतेवृष्णिः इलाभ्रुत्विपतिइलस्वमो
त्वेपणयोः अविडुलयोरेकत्वमरणात्पडः

दा॰
म॰
३३३
332

अतःकन्यएडकः स्त्रियामेडका समविडुति
ख्यातस्य ७ ॥ उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौर
भ्रकाजकं चक्रीवन्तस्तुवालेयारासभागर्द
भाः खराः ॥ उष्ट्राणांउरभ्राणांअजानांवृं
दे समूहे यथाक्रमं गोत्रोक्षेत्यादिनावुञ् औ
ष्ट्रकंएवंऔरभ्रकंआजकंच तैलादिवक्रश्र
मणावनुभ्रमणान्तमतुप् आसन्दीवदष्ठीव
च्चक्रीवदित्यादिनासाधुः चक्रीवान् ततोब
हुवचने बलये उपहारायसंहितोबालेयः २
हतस्थानिम्नइतिटक् फलिरूपयेत्यादिना
फञ्वारासेति उष्ट्रैःशब्दे क्रवेतिदूषभवृद्ध
भच्चरासभः नेर्देगर्दशब्देक्रमदृशलिंगर्दि
त्यभचुगर्दभः खेसुखेविवरंस्तिखरः आ
नइतिकः पंचखरस्य ५ ॥ वैदेहिकः सार्थ
वाहः ॥ विदेहाल्लोमुनिः तस्मातेववा
णिज्याथासमतइतिष्मादिभ्यश्चेतिवुञ्
वैदेहिकः सार्थान्समाधनान्वहतिदेशान्तरे
प्रापयति वाणिज्योपजीवनसंघंवहतिकर्म
णणुसार्थवाहः ॥ नैगमोवाणिजोवणि
क्पण्याजीवोह्यापणिकः क्रयविक्रयिकः
श्चसः ॥ निगमोवणिक्पथः पत्तनंतत्रभ
वःततोजातोवानैगमः निगमोवाणिजेषु
योमितिविश्वः नैगमः स्यादुपनिषद्वाणिजो
रितिचपण्यतेपणतेविज्याहेश्चवइतिइप्रत्य
यः स्वार्थेस्वः वाणिक्प्रज्ञाद्यणिवाणिजः
पण्येनविक्रययद्रव्येणजीवतिकः पण्याजी
वः आपणः क्रयविक्रयव्यवहारः तद्योगाद
तइतिठन्आपणिकः क्रयविक्रयाभ्यांजी
वति क्रयविक्रयाद्ठन् क्रयविक्रयकः अ

हौवणिजः ६ ॥ विक्रेतास्याद्विक्रयिकः क्रायि
कः क्रयिकः समौ ॥ विक्रेतात्रतेतः विक्रये
णजीवति वस्नक्रयविक्रयाट्ठन्नित्यत्रसंख्यातवि
ग्रहीतयोरपीष्टयोष्टन् विक्रयिकः द्वेविक्रे
तुः २ ॥ क्रेति ॥ क्रीणातीतिण्वुल् क्रायकः एवं
वत्तविक्रयिकवत् क्रयिकाद्वेक्रेतुः २ ॥ वाणि
ज्यंतुवणिज्याच ॥ वणिजांकर्मब्राह्मणादि
त्वात्ष्यञ्वाणिज्यं हृतवणिजोभावेचेतियः व
णिज्या द्वे २ ॥ मूल्यंवस्नोप्यवक्रयः ॥ प
ण्टनीनापुत्यत्तिकारणंहिरण्यंमूल्यंमूलेना
नाम्यंसमानिमिवनीयंनोवयइत्यादिनायत्
मूल्यंप्राप्तिहेतुत्वेचवस्नत्वत्र वसतेर्वाधिव
स्निधाएप्रोनः वस्नः अवक्रीयतेऽनेनपरव
अवक्रयः त्रीणिमूल्यस्य ३ ॥ नीवीपरिप
णोमूलधनं ॥ निपूर्वाद्व्येजोनिवीचेतिडिः
क्षमलोपहलोपः नेर्दीर्घः नीविः कटिकाव
दितिणेपूनीवी परिपण्यतेव्यवहारार्थंप्रकल्प
तेपरिपणः उमोतिघः मूलधनंसुगमं ॥
त्रीणिमूलधनस्य ३ ॥ लाभोधिकंफले
॥ मूलधनविक्रयादिहाधिकंलभ्यतेसला
भः कर्मणिघञ्लाभः फलेलाभः फलेजा
तीफलेसस्मात्मूल्यवद्धिलाभयोरितिमेदि
निः ॥ परीदानंपरीवर्तौनैमेयनियमावा
पि ॥ परिवर्तेनादानेक्वचित्प्रतिदानमिति
पाठः परिवर्तनेपरीवर्तः उपसर्गस्येत्या
दिनादीर्घः इमिज्ञोमेआयेअवायतइयनीने
णः प्रज्ञाद्यणिनैमेयः चत्वारिपरिवर्तस्य ४
॥ भ्रमाउपनिधिर्न्यासः ॥ उपसमीपेनिधीय

तेउपसर्गेहत्यादिनाकिः उपनिधिः न्यस्यतेनिक्षि
तेकर्मणिघञ् न्यासः द्वेनिक्षेपस्य २ ॥ प्रतिदा
नंतदर्पणं ॥ तस्यन्यासस्यार्पणंसमर्पणंप्रति
एवोदद्दातिर्नामार्थः प्रतीपंदानंप्रतिदानं ॥
क्रयेप्रसारितंक्रय्यंक्रेयंक्रीतव्यमात्रके ॥ अ
योस्यभवत्वितियत्तद्धट्टेप्रसारितंवस्त्रादि
क्रय्यंअचोयतक्रय्यस्तदर्थेइत्यादेशः १ क्रे
यमिति यत्तकेनापिप्रसारितंयद्दव्यंक्रेतव्य
मात्रंतत्क्रेयं ॥ विक्रेयंपणितव्यंपण्यंक्रे
य्यादयस्त्रिषु ॥ विपूर्वात्क्रीञोयतविक्रेयंप
णव्यवहारेतव्यत्तव्ययोः पणितव्यं अवद्यपण्य
त्यादिनायतिपण्यं त्रीणिविक्रेयद्रव्यस्य ३ ॥
क्रय्येतिसुगमं ॥ क्लीबेसत्यापनंसत्यंकारः
सत्याकृतिःस्त्रियां ॥ अवश्यंमयेदंक्रेतव्यमि
तिसत्यस्यकरणंसत्यापनंवणिगादिमध्यमंस
त्यापनेसत्यापनेतिण्यंतात्ल्युट्सत्यापनाम
त्याकृतिरितिस्त्रीकांडेबोपालितः सत्यस्यक
रणंकारंसत्यागदस्येतिङेसत्यंकारः सत्यस्य
कृतिःसत्यादशपथ्यइतिडाचूसत्याकृतिः ॥
त्रीणिसत्यमितिवचनरूपायाःक्रियायाः ३
॥ विपणोविक्रयःस्या ॥ विपणंविपणः पं
तात्ल्युटचविक्रयः २ ॥ संख्याःसंख्येयेद्या
दशत्रिषु ॥ आदशेतिदशशब्दात्प्रभृतिपर्यंतंअ
ष्टादशयावत् संख्याएकाधिकाःसंख्येयेद्र
व्येवर्त्तंते द्विवचनेनसहसामानाधि क
रण्येनैवनासांद्वित्वितित्यर्थः यथाएकोविप्रःद्वौ
विप्रावितिनत्वेवमपि करणेनद्वित्रिरितिन
त्वेकोविप्रस्यदशविप्राणामित्यादिअदशेति

आदृःमर्यादाभिविध्योरितिसमासः अनशब्दनपुं
सकादन्यवस्यामितिपात्विकः ॥ विंशत्याद्या
:सदैकत्वेसर्वाःसंख्येयसंख्ययोः ॥ विंशत्या
द्याःसर्वाएवसंख्याःसंख्येयेसंख्यायांचनित्यमे
कवचनांतावर्त्तंतेयथाविंशतिर्गावः विंशति
र्गवामिति ॥ संख्यार्थेद्विबहुत्वेस्तः ॥ यदा
तुभेदविवक्षायांसंख्यातत्रस्यार्थेऽभिधेयेविंश
त्यादयोवर्त्ततेतदासामानाधिकरण्याभावे
पिगवांविंशतीगवांविंशतयइति ॥ तासुचा
नवतेःस्त्रियः ॥ तासुविंशत्यादिसंख्यासुआ
नवतेरभिव्याप्यभिन्नलिंगेनापिसामानाधिक
रण्येस्त्रियःस्त्रीलिंगायथा विंशत्याचकपैःक्री
तंविंशतिः कुंडलानीतिविंशतिश्रुतिरष्टाविं
शतियावत् एकविंशतिश्रुतिः अष्टात्रिंशति
यावत् एवंचपंक्तिविंशतीत्यादिनासाधुःवे
॥ पंक्तिःशतसहस्रादिक्रमाद्दशगुणोत्तरं ॥
पंक्तिर्दशसंख्याद्वौपंचतौपंक्तिःपंक्तिविंशति
त्रिंशदित्यादिनासाधुः पंक्तिर्दशात्वरछेदोद
शसंख्यावलीष्वपिइतिविश्वः ॥ अतःप्रभृ
तिदशगुणोत्तरं क्रमेणशतसहस्रादिविज्ञेयं
दशसंख्यादशगुणाशतंसंख्यास्यात् शतदश
गुणासहस्रंसंख्यास्यात् तत्सहस्रंदशगुण
मयुतं तद्दशगुणंलक्षं तद्दशगुणंनियुतं
तद्दशगुणंकोटिः सादशगुणार्बुदं तद्दशगुणं
खर्वं तद्दशगुणंनिखर्वं तद्दशगुणंपद्मं तद्दश
गुणंमहापद्मं तद्दशगुणंशंकुः सादशगुणाःसमु
द्रः तद्दशगुणमंत्यं तद्दशगुणंमध्यं तद्दश
गुणंपरार्धं तद्दशगुणमनंतं तद्दशगुणंसंख्यं।

गं
मं

333
333/1

ततविंशतिसंख्यानमतःपरमसंख्येमिति ॥
योतवंडुवयंपाय्यमितिमानार्थकेत्रये ॥ मीयते
परिच्छिद्यतेऽनेनमानंतत्रयोतवादित्रयंमाना
र्थकंमानशब्दवाच्यं कमित्रयाणि वडलववचनां
तान्येवैवसर्वाणिनितित्तव योतुःशोधने तल्ये
तयातस्येदं योतवंडुःद्रवः तद्धिकारोङ्गोच्ये
डुद्रुतौमानेवयइतिवयःडुवयंपीयतेऽनेनेति
पाय्यं पाय्यसान्नाय्येत्यादिनासाधुः द्वौढशब्दा
पतेयथाकथंचिडनेयाः मानस्यचत्वारि ४ ॥
मानप्रकारमाह ॥ मानेतुलांगुलिःप्रस्थैः गु
ञ्जाःपंचाद्यमाषकाः ॥ तेषोडशाक्षःकर्षोस्त्री
पलंकर्षचतुष्टयं सुवर्णविस्तौहेम्नोऽक्षे कुरुवि
स्तस्तत्पले ॥ तन्मानस्त्रिधाः तुलांगुलिः
प्रस्थभेदाद्भवति तुलाग्रहणेनोन्मानमुपलक्ष्य
ते अंगुल्याहस्तादिप्रस्थेनद्रोणाढकादि गुंजा
इति पंचगुंजाः कृष्णलाःआद्यःप्रथमःमाषोऽथ
त्वात् जबफूघबषमषेतिमूर्धन्योतेषुपठ्यते ।
ततोवज्ञततःकः माषकोमूर्धन्यमध्यः आद्य
त्वंचदशकृष्णलापेक्षयोक्तं तेइति तेमाषकाः
षोडशमंतोऽक्षःस्यात्सचप्राग्जकः कर्षतिमा
षकादयिकंअक्षकर्षः द्वे पेति ॥ कर्षचतु
ष्कंपलंस्यात् पलगतोपचाद्यचु स्त्रिति ॥ हे
म्नोक्षेकर्षेसुवर्णमस्त्यसत्रशेआद्यचुसुवर्णः
हृदत्तसुवर्णस्वर्णविस्तयोरितिस्त्रीवमाह ॥
विस्यते उत्सृज्यते विसउत्सर्गेबाङुलकात् हे
मोत्पादिनातःविस्तःद्वे ह्मिति ॥ तन्मद्भेम्नःप
लेकरौकुरुदेशेविस्तः कुरुविस्तः ॥ तुलावि
शंपलशितंभारःस्याद्विंशतिस्तुलाः आचितो

दशभाराःस्युः शाकटोभारआचितः कार्षापणः
कार्षिकःस्यात्कार्षिकेताम्रिकेपणः ॥ यस्यक
स्यचिदृव्यस्यपलशतंतुलातुलउन्माने चुरादि
णिचोनित्यत्वाद्दिगुपधेतिकःटापितुलातोल्यते
ऽनयाचितौनाञ्जचकारस्यानुकूसमुच्चयार्थत्वात्
तुवात्तुलेतिनिर्देशाद्वा भेति विंशत्यातुलाभि
र्भारःस्यात्करणेघञ्अपिभरःभारः भारःसङ्ख्
ह्वद्वित्तयेःपलानामपिवीवधइत्यजयः आद्येति
॥ दशभाराःआचितःस्युः आचितशब्दवाच्याइत्य
र्थः भारैर्दशभिराचितइतिरत्नकोषः शेति शा
कटेननेयोवाह्योभारःसशाकटःशेषेणसचाचि
तोभारः सामानाधिकरण्यात्पुंस्त्वं कार्षेति सु
वर्णताम्रादेःशाणीयःपंचकृष्णलोमाषः सरज
तस्यद्विकृष्णलः तथाचमनुः द्वेकृष्णलेसमधृ
ते विज्ञेयोरूप्यमाषकइति द्वेहशेःषोडशमाष
कैःयोरजतकर्षः उत्कृष्टःआपणोव्यवहारः
कर्षापणयः अन्येषामपीतितीर्थेः कार्षापणः
कर्षकृतत्वात्कर्षस्याद्येअध्यात्मादित्वाट्ठञ्का
र्षिकः पुराणःस्यात्कार्षिक पुराणःकार्षापण
मितिबोपालितः पुराणश्चतस्यपर्यायःआढ्य
व्यवहारेणरजतकृष्णलयोःद्विदशावेडकाम्रू
ल्यंद्वात्रिंशत्ताच कृष्णलाभेरजतकर्षउच्यतेत
न्मूल्यंषोडशकपर्दकपणः तत्रैवचलोकैःपु
राणकर्षापणोकथ्यते द्वे नेति ॥ ताम्रकृत
त्वात्ताम्रस्यायंताम्रिकः एवंवत्तरज पंचकृष्ण
लकावइताम्रकार्षिकंपणःस्यात्सचप्राग्ज्ञः
आहव्यवहारेणहिपंचगुंजात्मकमाषकसंख्या
ताम्रपणस्याशीतिवराटकामूल्यंलोकेदृष्टचा
रात्कार्षपणोपणाव्यपदेशोमूल्यपवपणते ।

गं
नं
३३४
334

नेनेतिद्यः निल्यापणाइतिचपणाः ॥ अस्त्रियामा
ढकद्रोणौखारीवाहोनिकुंचकः कुडवः प्रस्थइ
त्याद्याः परिमाणार्थकाः पृथक् ॥ तुलामानमु
क्तं अंगुलिमानंचहस्तादिर्नृवर्गेउक्तं प्रस्थमानं
त्वाह चतुर्गुणसर्वत्रौमानमाढकं अवयवविव
क्षायामाढकीत्यपि आढौकतेआढकः एषोह
द्रोणउक्तः खनेर्ख्याटयश्चेतिक्लिन्ननकार
स्यारत्वंचनिपात्यते खारिः कटिकागादिति डीषि
खारीकूटेः कपन्कूटकंकुडवइतिचपाठः चतु
राढकोद्रोणः षोडशद्रोणाखारी विंशतिद्रोणा
:कुंभः दशकुंभोवाहइतिस्वामी अन्येतुखारी
पादोमानी मानीपादोहनिकुंचकः सचप्रसृति
इतिख्यातं इतिशाह्वेनाद्यर्थेनमानीभविकाप्र
वर्तिकाग्रहः पृथगितिप्रत्येकंभेदेनपरिमाणा
र्थकाइत्यर्थः प्रवर्तिकाचखारीपंचकं ॥ नउ
क्तंगणितपादेषु ॥ वाहोविंशतिखारीभिर्भवि
कापादनेनतु प्रवर्तः पंचखारीभिः शमयामा
नेप्रकीर्तिताः निकुंचपादस्तुर्याशः पादपादा
वशेषितं मानीद्रोणाढकप्रस्थकुडवेषुतथा
भवेदिति येतुमानार्थाः ॥ कुडवादयः ॥
पलंप्रकुंचकमुष्टिः कुडवस्तच्चतुष्टयं चत्वा
रः कुडवाः प्रस्थस्तुतैः प्रस्थैस्तथाढकं अष्टाढ
कोभवेद्द्रोणोद्विद्रोणाः शूर्पउच्यते सार्धशूर्पो
भवेत्खारीद्विशूर्पोद्रोणउच्यते तामेवभार
जातीयाद्वाहोभारचतुष्टयं शुष्कमेवेषिदंमा
नंहिगुणांवाहकेषुतु ॥ ततःहेशभेदात्संख्या
ख्याघात्वमितिस्वभूत्पादयः ॥ पादस्तुरीयो
भागः स्यात् ॥ पदरजेत्यादिनाघञ्पादः चे
शास्तुरीयइत्यपपाठः ॥ अंशभागौतुवण्टकः

॥ अमतिगच्छति अंशिरमेःशन् अंशइति
जिनेंद्रः तालव्यांतः भज्यतेसेव्यतेकर्मणिघ
ञ्भागः वटिविभाजने हलादिभ्योघ
ञेनाद्यास्वार्थेकन्वाण्टकः त्रीणिभागा
स्य ३ ॥ द्रव्यंवित्तंस्वापतेयंरिक्थमृक्थंध
नंवसु हिरण्यंद्रविणंद्युम्नमर्थरैविभवाअ
पि ॥ द्रवतिशब्दोअर्थवत्वात द्रव्यंचभव्यमि
तिनिपातनात्साधु द्रव्यंविद्यतेइति वित्तो
भोगप्रत्यययोरितिनिपातनात्तनत्वाभावः
स्वपतेर्धनपतेर्भावःप्रकारकंपथ्यतिथ्यो
त्यादिनाढञ्स्वापतेयं रिच्यतेविभज्यतेवि
रिच्विरेचने वमिकामिशीलादिनाथक्
रिक्थंऋच्यते वित्तनीवाडलकादयाहि
हृषिभ्यः थनः चस्यकत्वंऋक्थं धनतेबोड
लकात्कन् धनधान्येचिवाधने वसतीत्य
स्मिन्हेडच्यते आख्यायतेवा पद्यमिवसीत्या
दिनाउः वसु जिहीतेभावंवंतेओहाङ्गतौ
होहिवेतिअन्यप्रत्ययः हिरादेशश्च हिरण्यं
द्रवतिद्रुगतौद्रुदक्षिभ्यामिनच्द्रविणंदि
वेश्रृत्यंस्नायतिरूपीतिकः द्युम्नंअर्थ्यतेअर्थः
कर्मणिघञ्रातिरुत्वंरातेःडैरैःएकारांतः
राःपुमान् स्त्रीचराह्वयोर्विभवेस्वर्णेइतिक
द्रः विभवतिप्रभवतिअनेनऋदोरप्विभ
वः त्रयोदशसामान्येनधनस्य १३ ॥ स्या
त्कोषश्चहिरण्यंचहेमरूप्येकृताकृते ॥ कु
यतेशह्वायते कुङ्शब्देवाडलकात्षःकोषः
कुष्यतेनिष्कुष्यते आकुष्यते स्थानेभ्यःकर्म
णिघञ्वाहिरण्यमुक्तमेवकृताकृतेचजि

रा. मं.

३३४

हितावहितेकोषादिद्वयवाच्ये तालव्यमूर्धन्या
द्येतेऽत्यनेनतरंकोषविषदोवेतिषभेदः ॥ ता
र्क्ष्यंयदन्यतत्र्क्ष्यं ॥ तार्क्ष्यंहेमरूप्याभ्यांया
दन्यत्ताक्ष्र्यादितैजसद्रव्यादिकंतत्र कुप्यंगोप
नीयंस्यातवराजसद्रव्येत्यादिनासाधु ॥ रूप्यंत
द्द्वयमाहतं ॥ तयोःकुप्याकुप्ययोःद्वयंआह
तमस्यःपुत्तघादिरूपंमूल्यापयितेनिर्वोत
कयाताडितेरूप्यशाद्ववाच्यमित्यर्थः रूपादा
हतप्रशंसयोर्यत ॥ गारुत्मतंमरकतम
श्मगर्भोहरिन्मणिः ॥ गारुत्मतोगरुडाज्जाते
गारुत्मतंमरकंतरंत्वनेनग्रन्थेषुपीतिडः
मरकतं अश्मनोगर्भोयोनिःअश्मगर्भोहरिद्व
र्णोमणिःहरिन्मणिः चत्वारिमरकतमणेः
४ ॥ शोणरत्नंलोहितकंपद्मरागः ॥ शो
णंचतद्रत्नंचेतिशोणरत्नं लोहितमेवलो
हितात्स्वार्थेविनिकन्लोहितकं पद्मराग
इवरागोलौहित्यमस्यपद्मरागपमानेत्यादि
नासमासोत्तरपदलोपो पद्मरागः पद्मम
कोकनदं त्रीणिपद्मरागस्य ३ ॥ अथमौ
क्तिकंमुक्ता ॥ प्रागुक्तयामुक्तामुक्तैवमौ
क्तिकं विनयादिभ्यष्ठक् स्वार्थिकाः प्रकृतितो
लिंगवचनान्यतिवर्तन्तेपीतिक्लीवत्वं द्वे २
॥ अथविद्रुमःपुंसिप्रवालंपुंनपुंसकं ॥
विशिष्टोद्रुमःविद्रुमःविद्रुवद्रत्नद्रुमोवा
प्रवलतेज्वलतिकर्मतेभ्योणःप्रवालः द्वेप्र
वालस्य २ ॥ रत्नंमणिर्द्वयोरश्मजातौमुक्ता
दिकेपिच ॥ रतितनोतिकर्मणिणरतिता
नेएघोदरादित्वात्तकारस्याकारलोपः रत्नंम

णिशब्दार्थःनतः३:मणिः ३योषिमणिश्च अश्म
जातौरत्नजातीयमरकतपद्मरागमुक्तादिकेर
त्वादिनाप्रयोगः रत्नंस्वजातिश्रेष्ठेपीत्यनेका
र्थेवत्यते यथा अश्वरत्नंगजरत्नमित्यादि ॥
स्वर्णंसुवर्णंकनकंहिरण्यंहेमहाटकं ॥ तपनी
यंशातकौम्भंगांगेयंभर्मकर्बुरं ॥ चामीकरंजात
रूपंमहारजतकांचने ॥ रुक्मंकार्तस्वरंजाम्बून
दमष्टापदोस्त्रियां ॥ सुष्ठुअर्णोतिस्वर्णंतिप्रा
प्नोतिदीप्तिं अरणागतोपचाराच्च शोभनवर्णोऽ
लमस्येतिनैरुक्तेसकारलोपेस्वर्णं इकंयोतेव
